प्रवेश सं० ५८२३८ विषय: वैदिकप्रयोग: क्रम सं० ८५३

नाम कृष्णसिद्धि: ग्रन्थकार

पत्र सं० १-३७

श्लोक सं० अक्षर सं० (पंक्तौ) ३० पंक्ति सं० (पृष्ठे) ६

आकार: ०.७" x लिपि: दे० ना० आधार: कागज

वि० विवरण आ० ६० ५८

पी० एस० यू० पी०—८३ एस० पी० ई०—२३४१—२०,०००

004291

अथकुंडसिद्धिप्रारंभेयम्

Indira Gandhi National
Centre for the Arts

कुं०सि० ॥श्रीगणेशाय नमः॥ कृष्णात्रिगोत्रेनितरां पवित्रे पवित्रकर्माऽजनि बापुशर्मा॥ तत्सू
नुना विठ्ठलदीक्षितेन विरच्यते मंडपकुंडसिद्धिः॥१॥ स्पष्टार्थः॥ अथ कुंडमंडपा
१ दिविवक्षुस्तावद्धस्तादिपरिभाषाविपरीताख्यानक्यनुष्टुब्भ्यामाह॥ कृतोर्ध्वबा
होः समभूगतस्य कर्त्तुः शरांशः ५ प्रपदोच्छ्रितस्य॥ यो वा सहस्तस्य जिनां २४ शको
पि स्यादंगुलं तत्तदिभांशकाये॥२॥ यवोयूका च लिक्षा च बालाग्रमेवमादयः॥ कृ
तमुष्टिः करोरत्निररत्निरकनिष्टिकः॥३॥ कृतावूर्ध्वौ बाहू येन तथा समपादतया
स्थितस्य वा प्रपदं पादाग्रं तेन भुवमालंब्योच्छ्रितस्य कर्तुर्यजमानस्य यः पंचमांशः स
हस्तः। तस्य यो जिनांशकश्चतुर्विंशांशस्तदंगुलं तत्तदिभांशकाः तस्य तस्यांगु १
लादेर्येऽष्टभांशा अष्टमांशास्ते यवः यूका लिक्षा वालाग्रं एवमादयो रथरेणुत्रस्
तयो भवंति। एतदुक्तं भवति। अंगुलस्याष्टमांशो यवस्तस्याष्टमांशो यूका तस्याष्टमां
शो लिक्षा तस्या अष्टमांशो वालाग्रं तदष्टमांशो रथरेणुस्तदष्टांशस्त्रसरेणुस्तदष्टां
शः परमाणुरिति कृतमुष्टिर्यजमानहस्तः रत्निः स एकविंशत्यंगुलात्मकः स रत्निः
अकनिष्ठः मुक्तकनिष्ठः अरत्निः ससार्द्धद्वाविंशत्यंगुलात्मको हस्त एव। अरत्नि
हस्तयोः प्रायः अभेद एवेति व्याख्यायत्कात्यायनः। यजमानेनोर्ध्वबाहुना प्रपदो
च्छ्रितेन समस्थितेन वेति। तथापं चारत्निः पुरुषो दशपदो द्वादशांगुलं पदमिति।
तथा विंशतिशतांगुलः पुरुष इति। अत्र समस्थितेन प्रपदोच्छ्रितेन वेत्ययं कात्या
यनोक्तः श्रौतो विकल्पः। यतः कल्पस्य साक्षाच्छ्रुतिमूलकत्वं। श्रुतिद्वैधं तु यत्र स्या
त्तत्र धर्मावुभौ स्मृताविति। समस्थितेन प्रपदोच्छ्रितेनेत्येच्छिको विकल्पः॥ अथ पंच

Indira Gandhi National
Centre for the Arts

कुं॰सि॰ रात्रादिषु।आचार्यहस्तस्य कनिष्ठिकाद्यैश्चतुर्भिरेवांगुलिभिर्मुष्टिः॥मध्यमांगुलेर्मध्यम
२ पर्वभागेतिर्यग्द्विरियंतुमेयेत्यत्रआचार्यमानमुपदिष्टंतत्रापिआचार्यआचिनोतिअर्थान्
कर्मफलरूपाणीतियास्कवाक्यबलात् व्युत्पत्तिबलात् दानवाचनान्वारंभणवरवरण
व्रतप्रमाणेषुयजमानंप्रतिपादितिकात्यायनवचनाच्चआचार्योयजमानएव।अथस्मार्त्ते
स्मिन्कर्मणिकथंश्रौतवाक्यावसरइतिनाशंक्यंयथाश्रौतेष्वग्निहोत्रादौसदोपवीतिना
भाव्यंबद्धशिखेनचेत्याद्यविरुद्धंस्मार्त्तमंगीक्रियतेतद्वत्स्मार्त्तेष्वस्मिन्कर्मणिश्रौतंग्राह्य
मेवेति॥आदित्यपुराणे॥जालांतर्गतेभानौयत्सूक्ष्मंदृश्यतेरजः॥प्रथमंतत्प्रमा
णानांत्रसरेणुंप्रचक्षते॥१॥त्रसरेणुस्तुविज्ञेयोयेष्टौस्युःपरमाणवः॥त्रसरेणुस्तु
तेह्यष्टौरथरेणुस्तुसस्मृतः॥२॥रथरेणुस्तुतेह्यष्टौवालाग्रंतत्स्मृतंबुधैः॥वालाग्रा २

ण्यष्टलिक्षातुयूकालिक्षाष्टकंस्मृतं॥३॥अष्टौयूकायवंप्राहुरंगुलंतुयवाष्टकं॥तैरेव
॥रत्निस्त्वंगुलपर्वाणिविज्ञेयस्त्वेकविंशतिः॥अरत्निरकनिष्ठःसषोडशांशाविमुक्
करः॥४॥अरत्निरेवहस्तःस्यात्तावभिहितः।अरत्निंप्रकल्प्यचतुर्विंशत्यंगुलिभिर्मिमी
तेइति।अन्यदंगुलादिमानंयत्तत्कार्येषुद्रष्टव्यं।अथकुंडमंडपोपयोगीप्राचीसाध
नंविवक्षुस्तदुपयोगीनीमितिकर्त्तव्यतांस्रग्धरयाह॥शालापूर्वंधरित्रीदहनखनन
संप्लावनैःसंविशोध्यपश्चात्कलासमानांमुकुरजठरवद्धाचयित्वाद्विजेंद्रैः॥पुण्याहं
कूर्मशेषौक्षितिमपिकुसुमाद्यैःसमाराध्यशुद्धेवारेतिथ्यांचकुर्यात्करपतिककुभः
साधनंमंडपार्थं॥५॥पूर्वंप्रथमतोधरित्रीशालाइयंभूर्ममकुंडादिकर्तुंयोग्याअ
योग्येतिविचार्यततोदहनखननसंप्लावनादिभिःस्मृत्युक्तैःशोधनोपायैश्चसंशोध्य

कुं॰सि॰ ३

ततो गुणिजननेन बुध्या वा मुकुर जठरवत आदर्शोदरवत समां कृत्वा द्विजेंद्रैर्ब्राह्मणैः कृ
त्वा पुण्याहं वाचयित्वा कूर्म शेषो क्षितिं अपि शब्दात् वराहं पुष्पादिभिः समाराध्य प्रजयि
त्वा शुद्धे दिने तिथौ च कारा लग्ने मंडपार्थं सुरपतिककुभः प्राच्याः साधनं कुर्यात्॥ दितिया
ख्या॥ यच्छारदातिलके॥ नक्षत्रराशिवाराणामनुकूलेऽशुभेहनि॥ ततो भूमितलेऽशु
द्धे कुषांगारविवर्जिते॥१॥ पुण्याहं वाचयित्वा तु मंडपं रचयेच्छुभमिति॥ भूपरिक्षा पंच
रात्रे॥ तत्र भूमिं परीक्षेत वास्तुज्ञानविशारदः॥ स्फुटिता च सशल्या च वल्मीकारोहि
णी तथा॥१॥ दूरतः परिवर्ज्या भूः कर्तुरायुर्धनापहा॥ ईशकोणप्लवा सा च कर्तुः श्री
दा सुनिश्चितं॥२॥ पूर्वप्लवा वृद्धिकरी वरदा तूत्तरप्लवा॥ शेषकाष्टाप्लवा भूमिर्धना
युर्हननाशिनी॥३॥ ब्रह्माणी घृतगंधास्या त्क्षत्रिया रसगंधकृत्॥ क्षारगंधा भवेद्वै

३

श्या शूद्रा विट्गंधिनी क्षितिः॥४॥ ब्राह्मणी भूः कुशोपेता क्षत्रिया शरसंकुला॥ कुश
काशाकुला वैश्या शूद्रा सर्वतृणाकुला॥५॥ अनिषिद्धा यथा॥ सीता पीता तथा रक्ता
कृष्णवर्णसमन्विता॥ स्थिरोदका दृढा स्निग्धा भूमिः सर्वसुखावहा॥६॥ शीतस्पर्शो
ष्णकाले या वह्निस्पर्शा हिमागमे॥ वर्षासु चोभयस्पर्शा सा शुभा परिकीर्त्तिता॥७॥ इय
ग्रीवपंचरात्रे॥ सुंदरीणां रतिर्यत्र पुरुषैः सह सत्तम॥ काश्मीरचंदनामोदकर्पूरागरु
गंधिनी॥८॥ कमलोत्पलगंधा च जातीचंपकगंधिनी॥ पाटलामल्लिकागंधा नागके
सरगंधिनी॥९॥ दधिक्षीराज्यगंधा च मदिरासवगंधिनी॥ सुगंधिव्रीहिगंधा च शु
भगंधयुता च या॥१०॥ सर्वेषामेव वर्णानां भूमिः साधारणी मता॥ कुसुमप्रकरस्तद्वत्
परस्यान्म्लानिमृच्छति॥११॥ न निर्वाति तथा दीपस्तोयं शीघ्रं न जीर्यति॥ मधुरा च क

Indira Gandhi National Centre for the Arts

पायाच आम्लाचकटुकातथा ॥१२॥ कुशैः शरैस्तथाकाशैर्दूर्वाभिर्याचसंभृतेति ॥ प्रयो
गसारे ॥ वितस्तिमात्रविस्तारं निर्मायविवरंभुवि ॥ निक्षिपेत्तामसृदस्तस्मिंस्ताम्रशिष्टासु
शोभनं ॥३॥ समासुमध्यासंविद्यान्यूनाऽस्वधममुच्यते ॥ परिक्षेयेवंप्रयत्नेनत्यक्त्वाभूमिं
कनीयसी ॥२॥ अंगारतुषकेशादिहीनंकृत्वाकुभूतलं ॥ वासिष्ठ्यां ॥ खन्यमानेयदाकुंडे
पाषाणः प्राप्यते यदि ॥ तदापम्लवाच्योस्थिकेशांगारैर्धनक्षयः ॥१॥ भस्मनाचभयंप्रो
क्तंतुषैः प्रोक्तादरिद्रतेति ॥ शल्यज्ञानंमहाकपिलपंचरात्रे ॥ प्रासादारंभकालेचगृहा
दौचविशेषतः ॥ शल्योद्धारस्तुकर्तव्योयदीच्छेच्छुभमात्मनः ॥३॥ प्रासादारंभकालेतुयदं
गंस्पृशतेपुमान् ॥ वास्तुदेहेहृदंतत्रशल्यंविंद्याद्विचक्षणः ॥२॥ कंडूयतिशिरः पुंसि
शिरः शल्यंसमुद्धरेत् ॥ शल्यंतत्रास्थिविज्ञेयंखन्यमानंकरत्रये ॥३॥ अग्निदाहश्च ४

चरणेधनहानिश्चजायते ॥ यत्नेनोत्सादयेच्छल्यंयदीच्छेच्छुभमात्मनः ॥४॥ बाहुकंडूय
मानेतुनिर्दिशेच्छोहृस्थंखलं ॥ हस्तद्वयेनसंतिष्ठेल्लक्षणंगदितंतव ॥५॥ स्वामिनोम
रणंविंद्याद्विदेशगमनंतथा ॥ यत्नेनोत्सा० ॥६॥ ऊरूकंडूयमानेतुकांस्यशल्यंविनिर्दिशे
त् ॥ हस्तेनैकेनसंतिष्ठेल्लक्षणंगदितंतव ॥७॥ असतीचभवेद्भार्यायशोहानिश्चजायते ॥ ह
स्तोकंडूयमानेतुकंकालंचविनिर्दिशेत् ॥८॥ त्रिहस्तेनचसंतिष्ठेद्धन्यमानेचनान्यथा ॥ अ
ग्निदाहश्चरोगाश्चसशल्यमरणंभवेत् ॥९॥ पृष्ठंकंडूयमानेतुबाहुशल्यंविनिर्दिशेत् ॥
सार्द्धहस्तेनसंतिष्ठेल्लक्षणंगदितंतव ॥१०॥ गोनाशोराजदंडश्चसस्यहानिश्चजायते ॥
कुक्षौकंडूयमानेतुपाषाणंतत्रनिर्दिशेत् ॥११॥ हस्तद्वितयमानेनलक्षणंकथितंतव ॥
भुजंगदंशास्तत्रस्यात्कस्माच्छल्यंसमुद्धरेत् ॥१२॥ जानूकंडूयमानेतुभस्मतत्रविनिर्दिशेत् ॥

Indira Gandhi National
Centre for the Arts

कुं०सि० हस्तद्वयेनसंतिष्ठेछक्षणंगदितंतव॥१३॥अग्निदाहमनस्तापःक्लेशदुःखभयानिच॥करो
५ त्येवंविधंकर्मतस्मात्तंवैसमुद्धरेत्॥१४॥गोशृंगपीतमंडूकःशंखःशुक्तिश्चकछपः॥शंबूक
श्चप्रशस्ताःस्युर्याश्चान्यारत्नजातयः॥१५॥अंगारंवैतुषंकेशमस्थिशल्यंविचारयेदिति॥
वास्तुदेहज्ञानंसोमशंभो॥जानुनीकूर्पराशक्रेदिशिवातहुताशयोः॥पित्र्यांपादपुटौरौद्र्यां
शिरोस्यहृदयेंजलिरिति॥इदमभीष्टभूमौनवकोष्टंचक्रंविधायद्रष्टव्यं॥भूमिशोधनेअ
न्येपिदाहादयःसंस्काराःस्मृत्युक्ताअनुसंधेयाःविस्तारभयान्नालिख्यंते॥हयशीर्षपंच
रात्रेभूमिंतोयसमांकृत्वादर्पणोदरसन्निभामिति॥तत्प्रकारस्तुअस्मज्ज्येष्ठपुत्रकृतः॥
सुकाष्ठपट्टीचतुरंगुलोच्चांहस्तायतामंगुलविस्तृतांच॥कृत्वांतरंकालयुक्लंबकोंका ५
घतस्ततःपूरयसन्नदाकुं॥मत्स्यपुराणे॥वाराहंकूर्मशेषौचक्षितिंचैवविधानतः॥पू

जयेद्वास्तुकार्येषुविधिनासाधकोत्तमइति॥अथशंकुसमत्वसाधनंस्थूलप्राचीसाध
नंच॥उपजातिविपरीताख्यानिकीभ्यामाह॥रूपां१६गुलैःसंमितकर्कटेनसूत्रेणवा
वृत्तवरंविलिख्य॥रव्यं१२गुलंशंकुमनुष्यमध्येनिवेशयेद्वाक्षि२०मितांगुलाभिः॥६॥
चतसृभिश्चैवऋजूत्तमाभिःसंस्पृष्टशीर्षंतुसमेषिकाभिः॥तच्छं[illegible]भायत्रदिशोदये
यावृत्तेक्रमात्तौवरुणेंद्रकाष्ठे॥७॥रूपांगुलैःषोडशांगुलैःपरिमितेनकर्कटेनसू
त्रेणवावृत्तंविलिख्यतन्मध्येद्वादशांगुलंशंकुंदृढंसूक्ष्माग्रंस्थापयेत्॥कीदृशंविंश
त्यंगुलमिताभिःचतसृभिःऋजुभिःसमानाभिःशलाकाभिःकल्पितचतुर्दिग्गतदृ
तरेखाभिःसंस्पृष्टमस्तकं॥एवंशंकुसमत्वंसाधयित्वातादृशस्यशंकोश्छायापूर्वा
ह्णेयत्रयस्मिन्प्रदेशेवृत्तेप्रविशतियत्रचापराह्णेवृत्ताद्बहिरपेयात्।तत्रचिह्न्याःक्रमा

Indira Gandhi National
Centre for the Arts

त्प्रतीचीप्राच्योभवत इति व्याख्या॥ तत्र सार्धश्लोकस्योपपत्तिः॥ तत्र दोःकोट्योर्नामभेदो न स्व
रूपभेद इति॥ दोःकोटिवर्गयोगपदं कर्ण इति शंकुतलाद्वृत्तरेखां यावन्नीयमानं सूत्रं को
टिः १६ शंकुर्भुजः १२ एतत्कृत्योर्योगपदं कर्णः २० वृत्तपरिधिस्पृष्टादिग्गता छंकयं यावत्
न्नीयमानाश्च ततस्त्वः शलाकाः कर्णा भवंति॥ शुल्बोसमे शंकुं निखाय शंकुसम्मितया र
ज्वा मंडलं परिलिख्य यत्र रेखयोः शंकग्रच्छाया नियतति तत्र शंकू निहंति सा प्राचीति॥
अत्र शंकुसंमितयेत्युपलक्षणं॥ तेन अधिकया पि रज्वा वृत्तं कार्य। अन्यथा यत्राक्षभाष
डंगुला तत्र धनुःसंक्रांतौ द्वादशांगुलशंकोश्छायाप्रदेशस्तादृशे वृत्ते नास्या देव॥ तस्मा
दस्माभिः षोडशांगुलसूत्रेण वृत्तं कारितं॥ तथा वृत्ते कृते लाघवं च॥ एकेनैव वृत्तेन शं
कुसमत्वसाधनं दिक्साधनं च सिध्यति। अतएव रामः। शंकुमानाधिकव्यासदले वृत्ते  ६

भानुमान् सूर्यः यां दिशं याति अयनवशात्तस्यां दिशि नाल्यौ २

विशेषत इति। एवं स्थूलं प्राचीसाधनं कृत्वा सूक्ष्ममपि शालिन्याह॥ कर्ककीटगोमृगेयू
कयास्ता द्वाभ्यां चाल्यासिंहकुंभात्रिकेपि॥ यां वै काष्ठां भानुमान्याति तस्यां चाल्या द्वंद्वेका
र्मुके चालनं न॥ ८॥ सा प्राची कर्कसंक्रांतौ कीटवृश्चिकसंक्रांतौ वृषमकरसंक्रांतौ एकया
यूकया चाल्या सूर्यस्यायनवशात्॥ उत्तरायणे उत्तरतः दक्षिणे दक्षिणतः एवं सिंहत्
त्रिके सिंहकन्यातुलासंक्रांतेः कुंभमीनमेषसंक्रांतेश्च द्वाभ्यां यूकाभ्यां चालनीया अय
नवशात्। मिथुनधनुःसंक्रांतौ चालनं नास्तीति व्याख्या॥ अत्र॥ वृत्तेंभः सुसमकृतक्षि
तिगते केंद्रस्थशंकोः क्रमाद्भाग्रं यत्र विशत्यपैति च ततस्तत्रापरैन्द्र्यौ दिशौ॥ तत्काला
पमजीवयोस्तु विवराद्भाकर्णमित्याहता लंबज्याप्तमितांगुलैरयनदिश्यैंद्री स्फुटा
चालिता॥ १॥ इति सिद्धांतशिरोमणिमार्गेणेति कर्तव्यतां विधाय द्रष्टव्यमिति। ए

Indira Gandhi National Centre for the Arts

कुं०सि० ७

वंप्राचीसाधनंकृत्वा॥ अथोत्तरदक्षिणयोः साधनंशालिन्याह॥ रज्जुंद्विघ्नांसंध्यचिह्नां
सपाशांप्राचीशंकौपश्चिमेचापिदत्वा॥ कर्षेद्धीमान्दक्षिणेचोत्तरेचतच्चिह्नेस्याद्दक्षि
णाचोत्तरादिक्॥९॥ कुंडमंडपादेर्यावान्विस्तारस्तद्विगुणांकृतांमध्यांकात्उभयां
तयोः पाशवतींरज्जुंदद्यात्। सांतेप्राचीप्रतीच्योर्दत्तशंकौविन्यसेत्। ततोमध्यांकेधृ
त्वारज्जुंदक्षिणेउत्तरेचाकर्षेत्विद्वान्कर्षांकेदक्षिणाउत्तराचस्यादितिव्याख्या॥ अ
त्रस्पष्टैवयुक्तिरिति॥ अथरात्रौदिक्साधनोपायंवसंतमालिकयाह॥ निशिवाश्रवणो
दयाद्विगेंद्रीगुरुभस्योदयनेऽथवह्निभस्य॥ सुरसुरवार्द्धकिवायुभांतरालेप्यमुतःसा
धयपूर्ववच्चयाम्यां॥१०॥ अथवारात्रौश्रवणस्योदयेप्राची॥ अथवापुष्यस्योदयेप्राची
॥ अथवाकृत्तिकोदयेप्राची॥ अथवासुराणांवर्द्धकिस्त्वष्टा॥ वायुस्तयोर्भेचित्रास्वात्यो ७

तयोरंतरालेप्राची॥ अमुतःप्राचीतःपूर्ववत्॥ पूर्वोक्तेनयथायाम्यांदक्षिणदिशंसा
धयेतिव्याख्याशुल्बे॥ कृत्तिकाश्रवणःपुष्येश्चित्रास्वात्योर्यदंतरं॥ एतत्प्राच्यादिशो
रूपंयुगमात्रोदितेपुरइति॥ अथचित्रास्वात्योर्मध्येप्राचीत्युक्तंतन्मध्यस्यदुर्ज्ञेयत्वा
त्तदुपायमनुष्टुभाह॥ चित्राविध्वैकयास्वातीमन्ययापिशलाकया॥ तिर्यक्स्थांतरचि
ह्नाकुट्टिमस्थेन्यास्फुटेंद्रदिक्॥११॥ एकयाऋज्वाशलाकयाचित्रांविध्वाअन्ययाता
दृश्यैवशलाकयास्वातींविध्वातयोःशलाकयोरुपाग्रंदक्षिणोत्तरामध्यांकांतृतीयां
शलाकांसमतयादद्यात्॥ प्रथमद्वितीययोःशलाकयोर्मूलेएकीकृत्यतृतीयामध्यां
कांउभयसंपातंयावत्चतुर्थीशलाकांप्रांतेरज्जुप्रोतलंबकद्वयवतींपूर्वापरायतां
दद्यात्॥ यत्रलंबकौभूम्यांपतितौतत्रांकयोःपूर्वापरसूत्रदानात्स्पष्टाप्राचीत्यत्रस्प

Indira Gandhi National Centre for the Arts

च्छायुक्तिर्व्याख्या चेति॥ अथप्रकारांतरेण लघुपायेनोदीचीसाधनमाह॥ दिनमानदलेसप्तां
गुलछायाग्रतोहियत्॥ शंकुमूलेनीयमानंसूत्रंस्यादुत्तरादिशा॥१२॥ तिथिपत्राद्गणिता
द्वादिनमानमेतावदितिज्ञात्वाततोघटिकादिनाज्ञातेदिनार्द्धमध्याह्नेसप्तांगुलशंकोर्यत्र
छायाग्रंलगतितस्माच्छंकुमूलंयावन्नीयमानंसूत्रंदक्षिणोत्तरसूत्रमिति। अथवास
प्तांगुलशंकोर्गणितागतमध्याह्निकछायातुल्यातस्यैवछायायदास्यात्तदग्राच्छंकुमू
लेनीयमानंसूत्रंदक्षिणोत्तरेति। अत्रयुक्तिस्तस्मिन्समयेरविर्दक्षिणोत्तरवृत्तेभवती
ति। ततः पूर्ववत्पूर्वापरसाध्या। एवंदिकसाधनंविधायमंडपस्यचतुष्कोणत्वाच्चतुष्को
णसाधनंविपरीताख्यानमाह॥ दिगंतरशंकुद्वयगंद्विपाशंविस्तारतुल्यंतुगुणंदलांके॥ ८
कोणेप्रकर्षादितिवेदकोणेष्वेवंचतुःकोणमतीवसाधु॥१३॥ दिगंतयोः पूर्वदक्षिणयोःद

क्षिणापरयोःअपरोत्तरयोःउत्तरपूर्वयोः शंकुद्वयगंद्वौपाशौयस्यतांविस्तारेणतुल्यंगु
णंसूत्रंअर्द्धविह्नेधृत्वाकोणेआकर्षेत् एवंचतुर्ष्वपिकोणेषुइतिकृतेसाधुचतुरस्रंस्या
दिति॥ अथमंडपेविशेषंशालिन्याह॥ उच्चांभूमिंमंडपस्यप्रकुर्याद्धस्तोन्मानामर्धहस्तो
न्मितांवा॥ मध्येभूमिंमंडपेनोन्मितांचत्यक्त्वाकुर्यान्मंडपश्चेद्द्वितीयः॥१४॥ मंडपस्य
भूमिंहस्तोच्छ्रायामर्द्धहस्तोच्छ्रायांवाकुर्यात्॥ चेद्द्वितीयोमंडपःकार्योभवतितदामं
डपप्रमाणपरिमितांभूमिंमध्येत्यक्त्वाद्वितीयंमंडपंकुर्यादितिव्याख्या॥ यत्सिद्धांतशे
खरे॥ स्थलादर्कांगुलोच्छ्रायंमंडपस्थलमीरितं॥ कपिलपंचरात्रेमंडपंप्रकृत्योक्तं॥
उच्छ्रायोहस्तमानंस्यात्समंचसुशोभनं॥ तेनविकल्पोयंज्ञेयः॥ वास्तुशास्त्रेमंडपां
तरमुत्सृज्यकर्तव्यंमंडपांतरमिति॥ अथमंडपप्रमाणंवसंततिलकमाह॥ दश१०स

र्य१२करोन्मितोधमः स्याद्दिन१२शक१४प्रमितैः करैस्तमध्यः॥धृति१८भूप१६करोन्मि
तोवरीयान्नख२०हस्तोप्यथमंडपस्तु लायां॥१५॥दशद्वादशहस्तोमंडपोधमः स्यात्
॥द्वादशचतुर्दशहस्तोमध्यमः स्यात्॥षोडशाष्टादशहस्तउत्तमः॥तुलापुरुषदाने
विंशतिहस्तोप्युत्तमः॥मंडपेआयामंविस्तारात्तुल्यावेवेतिव्याख्या॥अत्रविस्ताराया
मयोरंगुलादिकंक्षिप्त्वात्यक्त्वावाष्टषायसिद्धार्थंव्यतितव्यं॥उक्तंविश्वकर्मणावणिक
धर्मेषुवेश्येषुमंडपेभोज्यवेश्मसु॥दृषंतुरंगशालायांयोगलागोकुलेषुचेति॥पंचरा
त्रे॥कनीयान्दशहस्तः स्यान्मध्यमोद्वादशोन्मितः॥तथाषोडशभिर्हस्तैर्मंडपस्यादि
होत्तमः॥तथा॥दशद्वादशहस्तोवद्विवृद्ध्यायततःक्रमात्॥लिंगपुराणे॥विंश
द्धस्तप्रमाणेनमंडपंकूटमेवच॥तथाद्वादशहस्तेनहस्तेनवापुनरिति॥ननु



द्वादशहस्तमंडपस्यकथंमध्यमत्वंमध्यमत्वंचेति॥उच्यते॥दशहस्तापेक्षयामध्यम
त्वंचतुर्दशहस्तापेक्षयाकनिष्ठत्वं॥यथा॥एकस्येवयजमानस्यकुत्रचित्गौणत्वं
मुख्यत्वंतद्वत्॥दशहस्तमंडपेनवकुंडीपक्षेपंचमेखलापक्षेचआचार्याधिकपवे
शनंनसंभवतीत्यत्ररत्न्यारत्नेकहस्तपरिमितेकुंडेकमेखलापक्षएवाऽऽदरणी
यऔचित्यादर्यात्परिमाणमितिकात्यायनोक्तेः॥उत्तमेपिमंडपे दशहस्तकुंडन
वपंचमेखलादिपक्षस्यसमावेशोनस्यादितिमंडपवृद्धिः कार्या॥यतोमंत्रमुक्ता
वल्यांचतुर्विंशतिहस्तपर्यंतंमंडपवृद्धिः॥वास्तुशास्त्रेतुपंचहस्तमारभ्यद्वात्रिंश
द्धस्तपर्यंतंवृद्धिःकर्मविशेषेउक्तासाचात्रविस्तरभयान्नलिख्यतइति॥अथद्वार
मानंवेदिमानंचाख्यानिकयाह॥दिगंतरालेद्विकरेभवेद्वाचतुष्टयंवेदगजांगुले

स्तत्॥ विवर्द्धितंमध्यवरिष्ठयोः स्याद्वेदीत्रिभागेनसमाकरोच्चा॥१५॥ दिङ्मध्यंद्वारचतु
ष्टयंद्विहस्तंभवतितद्वारमध्यमोत्तमयोर्मंडपयोः चतुरष्टांगुलवृद्धिमत्। मध्येमंडपेचतुरं
गुलावृद्धिः। उत्तमेचाष्टांगुलावृद्धिःकार्या। वेदीमंडपस्यतृतीयांशेनमध्येकार्या। मंडपेनव
कोष्टकेकृतेसतिमध्यकोष्ठेकार्या। समाहस्तमात्रमुच्चाकार्या। अन्यत्रइष्टकाभिःकार्येतत्
केवलंसमत्वंसाधनायेतिव्याख्या। पंचरात्रे। कनिष्ठेद्विकरंद्वारंचतुरंगुलवृद्धितः॥ मध्य
मोत्तमयोरिति। क्रियासारे॥ त्रिभागंमंडपंकृत्वामध्यभागस्तुवेदिका॥ हस्तमात्रंतदुत्से
धंचतुरस्रंसमंततः॥१॥ वसिष्ठोपि॥ हस्तोन्नतांचविस्तीर्णामिति॥ मत्स्यपुराणादिषु
यद्वेदिमानमन्यथातत्कर्मविशेषेज्ञेयं॥ सिद्धांतशेखरेतुविशेषः॥ वेदीचतुर्विधाप्रोक्ता १०
चतुरस्राच१पद्मिनी२॥ श्रीधरी३सर्वतोभद्रा४दीक्षासुस्थापनादिषु॥१॥ चतुरस्राच

तुःकोणावेदीसर्वफलप्रदा॥ तडागादिप्रतिष्ठायांपद्मिनीपद्मसन्निभा॥२॥ राज्ञांस्या
त्सर्वतोभद्राचतुर्भद्राभिषेचने॥ विवाहेश्रीधरीवेदीविंशत्यस्रसमन्विता॥३॥ दर्पणोदरसं
काशानिम्नोन्नतविवर्जितेति॥ अथतुलापुरुषदानेविशेषमाह॥ तुलाप्रदानेधमम
ध्ययोःसास्यात्पंचहस्तोत्तमकेद्वि७हस्ता॥ ईशानभागेग्रहवेदिकापिहस्तोन्मितोच्छ्राय
वतीत्रिवप्रा॥१७॥ तुलापुरुषदानेअधममध्यममंडपयोःपंचहस्ताउत्तममंडपेसप्तह
स्ताभवति। मंडपस्येशानभागेग्रहवेदीहस्तायामदैर्घ्योच्छ्रायांत्रिवप्राभवतीतिव्याख्या
॥मात्स्ये॥ पंचहस्ताभवेद्वेदीसप्तहस्ताथवाभवेत्॥ अत्रमध्याधमयोःपंचहस्ताउत्तमे
सप्तहस्तेतिनिबंधुभिर्व्यवस्थापितं। मंडपस्येशभागेतःग्रहवेदीकरोन्मितेति॥ अ
थस्तंभनिवेशनंभुजंगप्रयातशालिनीयामाह॥ समत्रिभागेचसूत्रंप्रदद्यादुदग्दक्षि

Indira Gandhi National
Centre for the Arts

णंचापिपूर्वापरंच॥ततस्त्र्यंशपूर्त्तौचकोणेषुदद्यात्समस्तंभकान् द्वादशैवेष्टहस्तान्॥१८॥
वेद्याः कोणेहस्तिहस्तोच्चवेदस्तंभान्दद्यात् वह्निदिक्कः सचूडान्॥ प्रादक्षिण्यात् पंचमां
शंकुभूमौ दध्यादेवं षोडशस्तंभसंस्था॥१९॥ समेत्य तृतीयेंशे पूर्वापरं दक्षिणोत्तरंचापिस्त
त्रंदद्यात्। एवंनवकोष्ठात्मकोमंडपोभवति। ततस्तृतीयांशांते षट्सु चतुर्षु बहिः कोणे
षुचसमांशुभान्दृढान्यज्ञीयवृक्षोद्भवान् पंचहस्तप्रमाणान् द्वादशस्तंभान्दध्या
द्रारयेत्। वेद्याः कोणेषुअष्टहस्तप्रमाणान्चतुरः स्तंभान्सचूडान् तादृशानेवाग्ने
यीदिक्कः प्रादक्षिण्याद्ध्याद्रोपयेत् स्तंभपंचमांशंभूमौ निखनेदेवंकृतेषोडशस्तंभस्था
पनंस्यादितिव्याख्यापंचरात्रे॥ मंडपार्द्धोच्छ्रितान्वेदसंख्यान्चूडान्वितांस्तथा॥ स्तंभा
न्समंचसंस्थाप्यस्तंभद्वादशकंपुनः॥२०॥ बाह्येप्युक्तप्रकारेणतत्रतत्रविभागतः॥ ११

अत्रयद्यपिसाधारण्येवमंडपार्द्धोच्छ्रितान्युक्तं तथापिषोडशहस्तमंडपार्द्धेनैवेति
ज्ञेयं। सर्वमुख्यषोडशहस्तस्यैवसर्वत्रोक्तवान्॥ यच्छारदातिलके॥ षोडशस्तंभसं
युक्तंचत्वारस्तेषुमध्यमाः॥ अष्टहस्तसमुच्छ्राया इतिपदसंख्याश्चूडान्वितांस्तथेति
वाक्यात्। चतुर्षुवेदिकोणगेषुस्तंभेषुचूडानियमः। अन्येषुद्वादशेषुकर्णाः चूडा
वाकार्याः॥ अन्यच्च॥ स्तंभोच्छ्रायेशिलान्यायेसूत्रयोजनकीलके॥ खननावटसंस्का
रेप्रारंभोवह्निगोचर इति॥ वास्तुशास्त्रे॥ पंचमांशंन्यसेद्भूमौ सर्वसाधारणोविधिरि
ति॥ अथस्तंभोपरिकाष्ठानिवेशनं द्वंद्वक्रमाह॥ स्तंभेषुतिर्यग्वलिकानिधेयाश्चू
डासुकर्णेष्वथवाबहिस्ताः॥ पूर्वापरंदक्षिणसौम्यदिक्स्थ कोणांतराकाष्ठचयंनि
दध्यात्॥२१॥ प्रथमंचतुर्षुस्तंभेषुवेदिकोणगेषुवलिकाख्यंकाष्ठचतुष्टयंप्रांते

Indira Gandhi National
Centre for the Arts

कुं॰सि॰ १२

छिद्रवन्निधेयं।तत्रपूर्वापरंद्वयंदक्षिणोत्तरंद्वयंचचूडासुविदध्यात्।तिर्यङ्निहितस्यकाष्ठ
स्यवलिकेतिसंज्ञा।एवंद्वादशस्वपिबाह्येषुस्तंभेषुकर्णेषुवाचूलिकासुवलिकाख्यकाष्ठानि
निधेयानि।ततोमध्यस्तंभचूडातःपूर्वापरमेकंदक्षिणोत्तरमेकंकोणेचैकंकाष्ठसमतयास्था
पयेदिति।एवंचतुर्ष्वपिस्तंभेषुद्वादशकाष्ठानिभवंतिततोमध्येमध्येचकाष्ठानिसकर्णानि
देयानीतिव्याख्या॥अथमंडपाछादनंरथोद्धतयाह॥मध्यभागशिखरंरचयित्वाछाद
येदपिकटैर्ऋजुवंशैः॥द्वारवर्जमिहमंडपमेनंस्तंभकानपिसुवस्त्रसमूहैः॥२०॥वेदि
स्तंभोपरिशिखराकारांरचनांकृत्वाएवंमंडपंद्वारवर्जितंकटैःऋजुवंशैश्चछादयेत्।
षोडशापिस्तंभान्सुवस्त्रसमूहैःकूलादिभिश्छादयेदितिव्याख्याक्रियासारे।नारि
केलैर्दलैर्वापिपल्लवैर्वाथवेणुभिः॥आछाद्यामंडपाःसर्वेद्वारवर्जंतुसर्वतः॥७॥वास्तु १२

शास्त्रे॥कटैःसद्भिस्तुसंछाद्याविजयाद्यास्तुमंडपाइति॥हयग्रीवपंचरात्रे॥दर्पणैश्चा
मरैर्घंटैःस्तंभान्वस्त्रैर्विभूषयेदिति॥अथतोरणान्याहवसंततिलकया॥पूर्वादिदिक्षु
रचयेदपितोरणानिन्यग्रोधजंतुफलपिप्पलवृक्षराजैः॥अश्वत्थजंबूफलपर्कटिभि
रियद्भिर्वैषामभावतइमान्यथवैककल्प्ये॥२१॥पूर्वादिदिक्षुवटोदुंबराश्वत्थप्लक्षैस्तो
रणानिरचयेत्॥अथवाश्वत्थोदुंबरप्लक्षवटैरचयेत्।एषांवृक्षाणामभावेइमानि
तोरणानि।एकेनैववृक्षेणयथोपपन्नेनरचयेत्।इतिव्याख्या।महाकपिलपंचरा
त्रे॥देवास्तोरणरूपेणसंस्थितायज्ञमंडपे॥विघ्नविध्वंसनार्थायरक्षार्थमध्वरस्य
च॥७॥न्यसेन्न्यग्रोधमैन्द्र्यांतुयाम्यांचोदुंबरंतथा॥वारुण्यांपिप्पलंचैवकौबेर्यांप्ल
क्षजंन्यसेत्॥२॥अश्वत्थोदुंबरप्लक्षवटशाखाकृतानिच॥मंडपस्यप्रदिशंचद्वारा

Indira Gandhi National
Centre for the Arts

एयेतानिकारयेत्॥२१॥ द्वाराकारत्वात् द्वारशब्दप्रयोगः पंचरात्रे॥अलाभेप्येकमेवेषांस
र्वाशासु निवेशयेदिति॥सर्वाभावे शमीजंबूखदिराणामन्यतमेनवाकार्याणीति॥अथतो
रणामानंनिवेशनंचविपरीताख्यानक्याह॥हस्ताद्बहिर्मंडपतः शरांगसप्तैः करैस्तान्यथ
मादिकेषु॥ दीर्घाणिचश्राकुरथापतिःस्यात्तेषांद्विहस्ताचरणत्रवृद्ध्या॥२२॥ मंडपान्मंड
पद्वारात् बहिर्हस्तमात्रे तानितोरणानि पंचषट्सप्तहस्तेदर्घाणि अधमादिकेषु अध
ममध्योत्तमेषु प्रवदंति। अथैतेषांतोरणानां आयतिरायामोपि द्विहस्तः चरणवृद्ध्या
मध्योत्तमेषु प्रवदंति। अथेतेषांतोरणानांआयतिरायामोपिद्विहस्तः
ममध्यमेमंडपेद्विहस्ताआयतिर्मध्यमे षडंगुलानिद्वौहस्तौ।उत्तमेसार्द्धहस्त
मुहस्यात्।अधमेमंडपेद्विहस्ताआयतिर्मध्यमे षडंगुलानिद्वौहस्तौ। उत्तमेसार्द्धहस्त
द्वयंइतिव्याख्या आग्नेये॥ पंचषट्सप्तहस्तानि हस्तखातेस्थितानिच॥ वास्तुशास्त्रे।
पंचहस्तप्रमाणास्ते विस्तारेण द्विहस्तकाः॥ षडंगुलाभिवृद्ध्याश्च सप्तहस्तास्तथोत्त १२

मे॥१॥ अर्थान्मध्यमेमंडपे षट्हस्ताः। तेतोरणाइति॥अथफलकादिनिवेशनंउपजा
तीद्वयवज्राभ्यामाह॥स्तंभार्धमानंफलकंतुतिर्यक् निवेशाविश्वप्रमितांगुलाश्च॥तन्म
र्द्धकीलाः खलरीयभागततास्तु शूलाकृतयश्चतेस्युः॥२३॥ तद्देशानंद्वित्रियुगांगुला
निशेवेतुविष्कोर्यजनेगुलार्द्धः॥कीलेषुशंखारिगदांबुजांकेष्विषंशरोयः किलतोरणे
षु॥२४॥ स्तंभानांतोरणस्तंभानांदशांगुलपरीणाहानामर्द्धेनतिर्यक्फलकंउपांतयोः
सच्छिद्रंस्यात्। फलकंनामतोरणस्तंभोपरितिर्यग्दीयमानंकाष्ठंपट्टिकेत्यभिधीयते।
अल्पमंडपतोरणेसार्द्धहस्तद्वयमितंमध्येहस्तत्रयपरिमितंउत्तमेचसार्धत्रयहस्त
मितंशैवेयोगेचतुःफलकमस्तकेशूलाकृतयःनचैकादशत्रयोदशांगुलदीर्घाः
स्युःचतुर्थांशेनविस्तृताः। तेनसपादद्वयपादोनत्रयसपादत्रयांगुलविस्तृताःस्तो

रणकाष्ठजाः कीलाः चत्वारो भवति। तेषां कीलानां फलकस्य मध्यभागे वेशनं द्वित्रिचतु
रंगुलमितं अल्पमध्योत्तमेषु स्यान्मंडपेषु॥ अथ विष्णुयागे पुनः अंगुलार्द्धरिति। अधमा
दिषु मंडपेषु दशद्वादशांगुलचतुर्द्दशांगुलदीर्घाः स्वचतुर्थांशेन विस्तृताः तेन सार्द्धद्व
यत्रिसार्द्धत्र्यांगुलायामाः वेशनार्थमधो लघुकीलेन सहिताः प्रागादिक्रमेण शंख
चक्रगदापद्मचिह्निताः कीलाः स्वतोरणकाष्ठभवाः फलकमध्ये निधेयां तोरणस्तं
भेष्वपि पंचमांशेन खननमिति व्याख्या॥ शारदातिलके॥ तिर्यक् फलकमानं स्यात्स्तं
भानामर्धमानत इति। संवमुक्तावल्यां॥ अयययोर्मध्यभागे च पट्टिकायां त्रिशूलकमि
ति॥ पिंगलामते॥ शूलेन चिह्निताः कार्या द्वारशाखास्तु मस्तके॥ शूलेन वांगुलं दै
र्घ्यं तुरीयांशेन विस्तृतिः॥४॥ ऋजुर्वेमं शृंगं किंचिद्वक्रं तु पक्षयोः प्रथमं तत्समाख्या १४

तं द्व्यंगुलं रोपयेत्तथा॥ शेषाणां द्व्यंगुलावृद्धिर्वेशश्चांगुलवृद्धितइति। वास्तुशास्त्रे॥ मस्त
के द्वादशांशेन शंखचक्रगदांबुजं॥ प्रागादिक्रमयोगेन न्यसेत्तेषां स्वदारुजमिति॥
अत्र द्वादशांशः शाखानामेव। केश्चित्फलकद्वादशांशेनेत्युक्तं तदसत्॥ शाखाः प्रकृ
त्यैव फलकादीनां मानोक्तेः। शूलान्यपि स्वदारूद्भवानीति न्यायं। शंखादिस्थानीय
त्वात्पंचमांशं न्यसेदूमो सर्वसाधारणो विधिरिति॥ अथ मंडपवर्णनव्याजेन मंडपालं
करणानि वदन्मंडपकर्तृभ्यः आशिषं शार्दूलविक्रीडितेन प्रयच्छति॥ उद्यत्यत्र फला
निनम्रविलसद्रंभाभिरालिंगितस्तंभो नेकदलैरसालविटपैः सर्वत्र संवेष्टितः॥ राज
च्चामरसंप्रबद्धमुकुरोदं च द्विजानां चितो युक्तः पुष्पफलैः फलाय भवतां भूयान्महामंड
पः॥२५॥ उद्यंति ऊर्ध्वीभवंति पत्राणि यासां ताः तथा फलैरिति नम्राः विलसंत्यः को

Indira Gandhi National
Centre for the Arts

मल्ला: एतादृश्योयारंभा: कदल्यास्ताभिरालिंगिता: स्तंभायस्यस स्तंभमल्लेध्वंतेताह
शाकदलीक:। बकुलपत्रैराम्रपल्लवै: सर्वत्रकृतवेष्टन: राजंतिचामराणियस्मिन्ताह
शा: सन् संत्रबद्धा: मुकुराआदर्शायस्मिन् तादृशा: सन्उदं चंतिउपरिविलसंतिएताह
शानिवितानितैरंचितोन्वित: पुष्पाणिपद्मचंपकजातीमालतीमल्लिकाकुमुदादीनिफ
लानिजंबीरदाडिमकदलीनारिकेलीपूगीफलादीनितैरन्वित:। एतादृशोयंमह्यामंडप: भव
तांफलायउत्तमफलप्राप्तयेभूयादितिव्याख्या॥ सिद्धांतशेखरे॥ चूतपल्लवमालाढ्यंवितानै
रुपशोभितं॥ विचित्रवस्त्रसंस्थानंपट्टकूलंविभूषितं॥१॥ सफलै: कदलीस्तंभै: क्रमुकैर्ना
रिकेलजै:॥ फलैर्नानाविधैर्भोज्यैर्दर्पणैश्चामरैरपि॥२॥ भूषितंमंडपंकुर्याद्दलपुष्पसमुज्व
लमिति॥ अन्यथाभावेपंचरात्रेदोषउक्त:॥ अनुक्तसाधनै: क्लृप्तोयदिवाकुटिलाकृति:॥ १५

कुं॰सि॰ १

मानाधिकोथवान्यूनोमंडप: कर्तृनाशन:॥३॥ यथोक्तैर्मंडपेफलाधिक्यंतत्रैव॥ आख्या
तसाधनै: क्लृप्त: सरल: सममानक:॥ मनोज्ञोमंडपोयोसौकर्मकर्तु: शुभावहइति॥ अ
थध्वजनिवेशनंविपरीताख्यानक्याह॥ ध्वजान्द्विहस्तायतिकांश्चपंचहस्तान्सुपीतारु
णकृष्णनीलान्॥ श्वेतासितश्वेतसितान्दिगीशवाहान्वहेद्दिकरवंशशीर्षे॥२८॥ ध्व
जान्द्विहस्तमितायामान्पंचहस्तेदीर्घान्सुपीतारुणकृष्णनीलश्वेतकृष्णश्वेतश्वे
तान्गैरिकादिलिखितदिक्पालवाहानान्। दशहस्तवंशमस्तकेयोजितान्। हस्तद्व
यनिखातान्ध्वजांस्तान् अपिपूर्वतइतिवक्ष्यमाणत्वात्प्राच्यादितआवहेद्धारयेदि
तिव्याख्या॥ प्रतिष्ठासारसंग्रहे॥ पीतरक्तादिवर्णाश्चपंचहस्ताध्वजास्मृता:॥ द्विपंच
हस्तेदृढेस्तेवंशजै: संयुतामताइति॥ क्रियासारे॥ मातंगवत्समहिषसिंहमत्स्येण

Indira Gandhi National
Centre for the Arts

वाजिनः॥ वृषभं च यथान्यायं ध्वजमध्ये क्रमाल्लिखेत्॥१॥ पंचाशाल्लिखनेदिति। अकरणे दोषः पंचरात्रे॥ चिंतयंत्यसुरश्रेष्ठा ध्वजहीनं सुरालयं॥ ध्वजेन रहिते ब्रह्मन्मंडपेन तथा भवेत्॥२॥ पूजायागादिकं सर्वं संपाद्यं यत्कृतं बुधैरिति। ध्वजारोपणफलं तत्रैव॥ यं कृत्वा पुरुषः सम्यक् समस्तफलमाप्नुयादिति॥ अथ पताकानिवेशनमाह॥ ध्वजनिवेशनं नवकुंडं पताकानिवेशनं चेंद्रवज्रानुष्टुब्भ्यामाह॥ लोकेशवर्णैस्त्वयुताः पताकाः शैलेंदुदैर्घ्यायतिकाश्च मध्ये॥ चित्रं ध्वजं दिक्करदैर्घ्यवंशं त्रिदोस्ततं प्रांतगकिंकिणीकं॥२७॥ श्वेतां च नवमीं पूर्वेशानयोर्मध्यतो बुधः॥ विन्यसेत्तु पताकां च ध्वजांस्ताअपि पूर्ववत्॥२८॥ लोकेशानां लोकपालानां चेद्वर्णाः पीतादयः पूर्वश्लोकोक्ताः गौरिकादिलिखितवज्रशक्तिदंडखड्गपाशांकुशगदात्रिशूलानि तैर्युक्ताः सप्तहस्तदी १६

र्घाः एकहस्तविस्तृताः पताकाः दशहस्तवंशशीर्षगाः चित्रध्वजं त्रिहस्तविस्तृतं प्रांते वर्तमानकिंकिणीकं शीर्षसचामरं दशहस्तं दैर्घ्यवंशश्च तादृशं तन्मध्ये विन्यसेत् पूर्वादितः पताकाश्च विन्यसेदित्युत्तरश्लोकेनान्वयः। नवमीं पताकां पूर्वेशानयोर्मध्ये श्वेतां तादृशीमेवाचार्यः कुंडे विन्यसेत्। ध्वजानंता अपि पताका पूर्वादिक्रमेण भूमौ पंचांशारोपणेन विन्यसेदिति व्याख्या॥ तदुक्तं सारसंग्रहे॥ प्रतिकुंडं पताकास्तु प्रोक्ताः शास्त्रार्थकोविदैः॥ --- सप्तहस्ताः स्युः सप्तमांशेन विस्तृताः॥१॥ लोकपालानुवर्णैर्नवमी तुहिनप्रभा॥ पताकाश्च ध्वजाश्चापि गंधपुष्पसमन्विता इति॥ परशुरामः॥ त्रिहस्तविततो दीर्घो दशहस्तो विचित्रितः॥ चामरेणान्वितः शीर्षे प्रांते सक्षुद्रघंटिकः॥१॥ दशहस्ते ध्वतो दंडे पुष्पगंधैः समन्वित इति॥ कुंडनिवेशनं विपरीताख्यानक्याह॥ प्रा

Indira Gandhi National
Centre for the Arts

कुंसि० १७

च्याश्चतुः कोणभगेंदुखंडत्रिकोणवृत्तांगभुजांबुजानि॥ अष्टास्त्रिशक्रेश्वरयोस्तु मध्ये
वेदास्त्रिवा वृत्तमुशंतिकुंडं॥ २६॥ प्राचीत आरभ्य चतुरस्रयोनिवृत्तार्द्धत्रिकोणवृत्तषडस्र
पद्माष्टास्त्रिकुंडानि भवंति। प्राचीशानयोर्मध्ये नवममाचार्यकुंडं स्यात्। तच्चतुरस्रं वृत्तं
वेति व्याख्या॥ शारदातिलके॥ अष्टास्वाशासु रम्याणि कुंडान्येतान्यनुक्रमात्॥ चतु
रस्रं योनिरर्द्धचंद्रं त्र्यस्रं च वर्तुलं॥ १॥ षडस्रं पंकजाकारं अष्टास्रं तानि नामतः॥ आचार्य
कुंडं मध्ये स्यात् गौरीपतिमहेंद्रयोः॥ २॥ इति। सिद्धांतशेखरे॥ पुरंदरेशयोर्मध्ये वृत्तं वा
चतुरस्रकं॥ तदाचार्यविनिर्दिष्टमिति॥ अयमुत्तमः पक्षः॥ अथ पंचकुंड्येककुंडनिवेश
नमिंद्रवज्रयाह॥ आशेशकुंडेरिह पंचकुंडी चैकं यदा पश्चिमसोमशैवे॥ वेद्याः सपादेन
करेण यद्वा पादांतरेणाखिलकुंडसंस्था॥ ३०॥ आशादिक तत्र कुंडानि चतुरस्रवृत्तार्द्ध १७

वृत्तपद्मानि ईशदिशि कुंडं चतुरस्रं वृत्तं वा तैः पंचकुंडीनिवेशनं स्यात्। यदा चैकमेव कुंडं तदा
पश्चिमे उत्तरे वा ईशान्यां वा स्यात्। परं तु चतुरस्रा वेद्याः सकाशात् तानि सर्वाणि कुंडानि स
पादेन करेण त्रिंशदंगुलांतरेण वा वेदीयावांतरेण वेद्याश्चतुर्थांशेन वा मंडपेन वकोष्ठे
कृतेषु सुभागेषु मध्ये वा भवंतीति व्याख्या। नारदीये॥ यत्रोपदिश्यते कुंड चतुष्कं तत्र
कर्मणि॥ वेदास्रमर्धचंद्रं च वृत्तं पद्मनिभं तथा॥ १॥ कुर्यात् कुंडानि चत्वारि प्राच्यादिषु वि
चक्षणः॥ पंचमं कारयेत् कुंडं ईशदिग्गोचरं द्विजेत्॥ २॥ अयं मध्यमः पक्षः केचित्पूर्वे
शयोरिति लिखितं तदसत्॥ सोमशंभौ॥ एकं वा शिवकाष्ठायां प्रतीच्यां कारयेद् बुधः॥
आचार्या अपि॥ अथवा दिशि कुंडमुत्तरस्यां प्रविदध्याच्चतुरस्रमेकमेवेत्ययं कनिष्ठः
पक्षः॥ नवग्रहाधिकारे वसिष्ठसंहितायां॥ कुंडं तन्मध्यभागे तु कारयेच्चतुरस्रकं॥ वि

Indira Gandhi National Centre for the Arts

कुं०सि०
१८

तस्ति द्व्यरवातं च कुंडं स चतुरं स्रुलं इति। वेदीपादांतरं त्यक्त्वा कुंडानि नव पंच तेति॥ नारदीये॥ कुं
डं वेद्यंतरं चैव सपादकरसम्मितमिति। केचित्त्रयोदशांगुलमप्यंतरमुक्तं तत्र मंडपानुसारे
ण व्यवस्था॥ अथ वर्णविशेषे स्त्रीणां च कुंडविशेषं शारदातिलके न्याह॥ विप्रातश्चतस्रं च वृत्तं च
वृत्तार्द्धं त्र्यस्रमस्या द्वदकोणानि वापि॥ सर्वाण्याकुर्ह तरूपाणि वान्येयोन्याकाराण्यंगना
नां च तानि॥ २१॥ विप्रादारभ्य विप्र क्षत्रियविट्शूद्राणां चतुःकोणवृत्तवृत्तार्द्धत्रिको
णानि भवंति: अथवा विप्रादिवर्णेषु चतुष्टानि वा सर्वाणि कुंडानि भवंति। यदा स्त्रीयज
माना ... तदा योन्याकाराण्येव कुंडानि भवंतीति व्याख्या॥ शारदायां॥ विप्राणां चतुर
स्रं स्याद्राज्ञां वर्तुलमिष्यते॥ वैश्यानामर्धचंद्राभं शूद्राणां त्र्यस्रमीरितं॥ ३॥ चतुरस्रं तु
सर्वेषां केचिदिच्छंति तांत्रिकाः॥ पंचरात्रे॥ सर्वाणि तानि वृत्तानि चतुरस्राणि वा सदा॥ १८

सनत्कुमारः॥ स्त्रीणां कुंडानि विप्रेंद्र योन्याकाराणि कारयेदिति॥ अथ प्राच्यादिकुंडेषु
फलविशेषमाह॥ सिद्धिः पुत्राः शुभं शत्रुनाशः शांतिर्मृतिच्छिदे॥ वृष्टिरारोग्यमुक्तं हि
फलं प्राच्यादिकुंडके॥ २२॥ प्राच्यादिकुंडेष्वष्टस्वष्टौ फलानि स्युः। शारदायां॥ सर्वसिद्धि
करं कुंडं चतुरस्रमुदाहृतं॥ पुत्रप्रदं योनिकुंडमर्द्धचंद्राभं शुभप्रदं॥ १॥ शत्रुक्षयकरं त्र्य
स्रं वर्तुलं शांतिकर्मणि॥ छेदमारणयोः षष्ठं षडस्रं पद्मसंनिभं॥ २॥ वृष्टिदं रोगशमनं
कुंडमष्टास्रमीरितं॥ कामिके तु फलांतरं॥ ऐंद्र्यां स्तंभे चतुःकोणं अग्नौ भागे भगाकृतिः
॥ चंद्रार्द्धं मार्गणे याम्ये द्वेषे त्र्यस्रं तु नैर्ऋते॥ ३॥ वारुण्यां शांतिके वृत्तं षडस्रं तूच्चाटने ऽ
निले॥ उदीच्यां पौष्टिके पद्मं राज्यामष्टास्रि भुक्तिदं॥ २॥ अथ होमसंख्यया कुंडमानं
शिखरिण्याह॥ शतार्धे रत्निः स्यात् शतपरिमिते रत्निविततं सहस्रे हस्तः स्यादयुत

हवने हस्तयुगलं॥ चतुर्हस्तं लक्षे प्रयुतहवनेषट्करमितैः ककुभिर्वा कोटौ त्वष्टकरमपि प्राकु
रपरे॥ ३३॥ शतार्द्धमिते पंचाशन्मिते होमे रत्निमितं कुंडं। शतमिते अरत्निमितं। सहस्रमि
ते होमे हस्तमितं। दशसहस्रमिते द्विहस्तं। लक्षहोमे चतुर्हस्तमितं। दशलक्षहोमे षट्ह
स्तं। कोटिहोमे अष्टहस्तमितं। दशहस्तमितं वा केचित्। षोडशकरमपि प्राकुरिति व्याख्या
॥ भविष्यत्पुराणे॥ मुष्टिमाने शतार्द्धे तु शते चारत्निमात्रकं॥ सहस्रे तु अथ होतव्ये कुंडं कुर्या
त्करात्मकं॥ १॥ द्विहस्तमयुतेनैव लक्षहोमे चतुःकरं॥ दशलक्षमिते होमे षट्करं संप्रच
क्षते॥ २॥ अष्टहस्तात्मकं कुंडं कोटिहोमेषु नाधिकं॥ शारदायां॥ दशहस्तमितं कुंडं को
टिहोमेपि शस्यते॥ स्कांदे॥ कोटिहोमे चतुर्हस्तं चतुरस्रं समंततः॥ योनिवक्त्रद्वयोपेतं त
दप्याकुस्त्रिमेखलमिति। इदं प्रायः स्थूलहव्यविषयं॥ अथ केषांचिन्मते कुंडमानमुप १९

जातिकयाह॥ लक्षैकवृद्ध्या दशलक्षकांतं करैकवृद्ध्या दशहस्तकं च॥ कोट्यर्द्धदिक्विंश
तिलक्षलक्षदलेमुनीषट्कुशानुहस्तं॥ ३४॥ लक्षस्यैकवृद्ध्या दशलक्षकाणामंतं स
माप्तिमर्यादीकृत्य   त्यां दशलक्षकांतं एकलक्षमारभ्य लक्षवृद्ध्या दशलक्षपर्यंतमि
त्यर्थः। करस्य एकवृद्ध्या दशहस्तकं मर्यादीकृत्य त्यादशहस्तकं   एकक
रमारभ्य एककर   वृद्ध्या दशहस्तं यावत्कुंडं प्राकुरिति पूर्वेणान्वयः। कोटेरर्द्धं पं
चाशल्लक्षे। दशलक्षे विंशतिलक्षे लक्षदले पंचाशत्सहस्रे क्रमात् सप्तपंचषट्त्रि
करं कुंडमिति व्याख्यां॥ शारदायां॥ एकहस्तमितं कुंडं लक्षहोमे विधीयते॥ लक्षा
णां दशकं यावत्तावद्धस्तेन वर्द्धयेत्॥ १॥ सिद्धांतशेखरे॥ लक्षार्द्धे त्रिकरं कुंडं लक्षहो
मे चतुःकरं॥ कुंडं पंचकरं प्रोक्तं दशलक्षाकृतौ क्रमात्॥ १॥ षट्हस्तं लक्षविंशत्या कोट्य

कुं०सि० २०

र्द्धहस्तसप्तकमिति। इदमेव कुंडमानं कामिककादिमनसिद्धांतशेखरशारदाहेमाद्रि मुखैः प्राचीनैः रामवाजपेयिराघवभट्टकुंडकौमुदीकारादिभिर्नवीनैश्चालिखितं कुत्र चित्। अन्यथापि कुंडमानान्युक्तानि तानि तत्तत्प्रकरणवशात्तत्कर्मविशेषे द्रष्टव्या नि। अथैकहस्तात् दशहस्तांतं यावत् कुंडेषु भुजमानं शार्दूलविक्रीडितेनाह।। वे दाक्षी।णियुगाग्नयः शशियुगान्यष्टाब्धयस्त्रीषवो ष्टाक्षावद्रिरसा रसांगकमितानेत्रर्षयो क्षस्वराः॥ अंगुल्यो यवाः खमभ्रमिषवः खपंचषट्सागराः सप्ताश्चंमुनय स्त्वमी निगदिता वेदास्रके बाहवः॥२५॥ एकहस्ते कुंडे चतुर्विंशत्यंगुलान्यायामवि स्तारौ द्विहस्ते चतुस्त्रिंशदंगुलानि। इ मानि पादोनयूकाचतुष्टयन्यूनानि। अ

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | १६ |
| २४ | ३४ | ४१ | ४८ | ५३ | ५८ | ६३ | ६६ | ७२ | ७५ | २६ |
| ० | ० | ५ | ० | ५ | ६ | ४ | ७ | ० | ७ | ० |

२०

ल्पांतरत्वात्पूर्णान्येव बध्यतानि। त्रिहस्ते पंचयवाधिकैकचत्वारिंशदंगुलानि। चतु र्हस्ते अष्टचत्वारिंशत्। पंचहस्ते पंचयवाधिकानि त्रिपंचाशदंगुलानि। षड्ढ स्ते पादोनैकाषष्टिः। सप्तहस्ते सार्द्धत्रिषष्टिः। अष्टहस्ते यवोना सप्तषष्टिः। नवहस्ते द्विसप्ततिः। दशहस्ते यवोना षट्सप्ततिरिति। चतुर्भुजे कुंडे भुजा उक्ता इति व्या ख्या। अत्रोपपत्तिः। एकहस्तक्षेत्रस्य चतुर्विंशत्यंगुलात्मकस्य भुजकोटिघातः क्षे त्रफलं तच्च षट्सप्तत्यधिकपंचशती ५७६ एतत्स्वदं एकहस्तक्षेत्रांगुलानि चतु र्विंशतिः २४ एवं क्षेत्रफलस्य द्व्यादिगुणस्य मूलं चतुस्त्रिंशदाद्यांगुलानि भवंति ॥ अथ योनिनिवेशनमिंद्रवज्रयाह॥ कुंडत्रयी दक्षिणयोनिरैंद्र्याः सौम्याग्रकास्या दितराणि पंच॥ पश्चाद्गणाग्नीद्रदिगग्रकाणि योनिर्न कोणेन च योनि कुंडे॥२६॥

६२

कुं०सि०
२९

ऐंद्र्यः प्राच्या आरभ्य कुंडत्रयी चतुरस्रयोनिवृत्तार्द्धरूपा दक्षिणदिक्योनिः स्यात् उत्त
राया। अर्थाद्धोता उदङ्मुखः इतराणि पंच कुंडानि त्र्यस्रवृत्तषडस्रपद्माष्टास्राणि प्रत्य
ग्योनीति प्रागग्राणि अर्थाद्धोता प्राङ्मुखः नवममपि कुंडं दक्षिणयोनि मुदगग्रं। योनिः
कोणयोनिकुंडे च न कार्येति व्याख्या॥ स्वायंभुवे॥ प्रागग्नियाम्यकुंडानां प्रोक्ता योनिस्
दङ्मुखी॥ पूर्वामुखाः स्थिताः शेषा यथाशोभा व्यवस्थिता इति॥ त्रैलोक्यसारे॥ न
वमस्यापि कुंडस्य योनिर्लक्ष्यदले स्थितेति। अन्यत्र॥ नार्पयेत्कुंड कोणेषु योनिजां तं
त्रवित्तम इति॥ योनिकुंडे तथा योनिपद्मे नाभिविवर्जयेदिति॥ अथ सर्वेषां कुंडान
प्रकृतिभूतं चतुरस्रं तावच्छालिन्याह॥ द्विघ्नव्यासं तुर्यचिह्नं सपाशसूत्रं शंकोप
श्चिमे पूर्वगे पि॥ दत्वा कर्षेत् कोणयोः पाशतुर्ये स्यादेवं वा वेदकोणं समानं॥ अ्श २९

इष्टव्यासाद्द्विगुणितव्यासं चतुर्यांशकृतचिह्नं सपाशसूत्रं पूर्वपश्चिमस्थयोः शंको शं
र्दत्वा दक्षिणोत्तरसूत्रमध्ये यथा मध्यचिह्नं भवति तथा कोणयोः पाशाच्चतुर्थांशे
कर्षेत् एवमन्यतोपि एवं कृते समचतुरस्रं स्यात्। इदमेव सर्वेषां कुंडानां मूलमि
ति व्याख्या उक्तं॥ चतुरस्रमिदं प्रोक्तं सर्वकुंडेषु कारणमिति॥ अत्र समश्रुतौ तु
ल्यचतुर्भुजे च तथायते तद्भुजकोटिघातः क्षेत्रफलं सद्सप्तत्यधिक पंचशती
५७६ एतावदेव योन्यादिकुंडेषु एकहस्तेषु यथा क्षेत्रफलं संपद्यते तथा यतितव्य
मिति॥ अथ योनिकुंडमिंद्रवज्रयाह॥ क्षेत्रे जिनांशेन पुरः शराशान् संवर्ध्य च
स्वीयरदांशयुक्तान्॥ कर्णाधिमानेन लिखेंदुखंडे प्रत्यक्पुरो काद्गुणतो भगाभम्
॥२८॥ चतुरस्रे क्षेत्रे चतुर्विंशतिभागे सति पंचांशान् स्वीय द्वात्रिंशदंशयुक्तान्

Indira Gandhi National
Centre for the Arts

अग्रेसंवर्ध्यततश्चतुर्धाविभक्तस्यक्षेत्रस्यपश्चिमचतुरस्रद्वय
मध्यांकान्कर्णसूत्रस्यचतुर्थांसप्रत्यक्पश्चिमभागेइंदुखंडे
वृत्तार्धद्वये।विद्वान्लिखेत्।ततःपूर्वांकान्दक्षिणोत्तरसूत्रसंल
ग्नवृत्तार्द्धंयावल्लीयमानेगुणद्वयतोभगाकारंयोनिकुंडंस्यादि
तिव्याख्या॥अष्टक्षेत्रफलानयनं॥अत्रक्षेत्रत्रयं॥पूर्वांकाद्दक्षि
णोत्तरसूत्राग्रंयावल्लीयमानंसूत्रंद्वयात्रिकोणमेकं।तथादक्षि
णोत्तरसूत्राग्रात्पूर्वापरसूत्रापरांतंयावल्लीयमानसूत्रद्वयादपरंत्रिकोणं।उभय
वृत्तार्द्धंमिलित्वाएकंवृत्तमितितृतीयं।क्षेत्रत्रयफलयोगेपूर्णफलं।तत्रप्रथम
स्यक्षेत्रफलं।अत्रलंबःअंगुलानि१७यवः१यूकाः२भूः२४लंबेननिघ्नंकुमु 

खेक्यखंडमिति।अत्रमुखाभावात्भूम्यर्धमेवलंबेनगुणितंसत्जातंप्रथमक्षेत्रफलं
व्यंगुलानि२०५यवाः७अथापरस्यलंबः१२भूः२४सेव।अत्रापितथैवरीत्याक्षेत्रफ
लं१४४अथवृत्तार्धयोरेकवृत्तंतत्फलंतत्रवृत्तव्यासः१६।७।६।३॥व्यासस्यवर्गेभ
नवाग्निनिघ्नेसूक्ष्मंफलंपंचसहस्रभक्ते इतिव्यासवर्गः२८८।०।०।२अयंभनवाग्नि
३९२७निघ्नःपंचसहस्रभक्तोजातंक्षेत्रफलंवृत्तस्य२२६।३।४फलत्रयाणांयोगे
क्षेत्रफलंपूर्णं५७६।४।५अत्रलिक्षापंचकंयूकाचतुष्टयंचाधिकंअल्पांतरत्वाद
दोषःध्वजायसिद्धिश्चउक्तं॥स्थापयेत्सर्वकुंडानांध्वजायःसर्वसिद्धिदः॥शतांशो
वाधिकंहीनकासरद्धीनदूषयेत्॥१॥आयदोषविशुध्यर्थंक्रियतेशास्त्रकोविदै
रिति।एतत्क्षेत्रस्यउत्तरायत्वात्।उदीचीप्राचीवद्युवहर्त्तव्याएवमन्ययो,रपि।यत्स

Indira Gandhi National
Centre for the Arts

दार्थादर्शी॥ चतुर्विंशतिधामध्यसूत्रं भक्त्वा पुरोन्यसेत्॥ पंचांशात्चैककस्यत्रीन् विंशांशाको
णपादयः॥ वृत्तार्द्धस्तोमध्यतिर्यक्सूत्रांतं च ततोर्पयेत्॥ पुरोवर्द्धितसूत्रांतं द्वे सूत्रेस्याद्दगाक
तीति॥ इमानिकुंडानि कामिकादिमतादिग्रंथविरुद्धानीति अनादरणीयानिन॥ तानि वचना
नि तदाकारत्वमात्रसंपादकानि न क्षेत्रफलपूर्त्तिकरां तत्र शिष्यक्लेशो माभूदिति स्थूलमा
र्गेणयोन्याद्याकारमात्रं प्रतिपाद्यते। योगणितानभिज्ञस्तेन चतुरस्रकुंडं तंडुलादिनापू
रयित्वा तथा तानेव तंडुलान् योन्यादिकुंडेषु दत्वा तत्पूर्त्तौ तोष्टव्यमिति।
अत्रांगुलयव यूकालिक्षाः कृत्वा गोमूत्रिकारीत्या गुणयित्वा अष्टभिर्भा
गेर्हृते फले च उपर्युपरि चयोज्यामानेकलाद्यं फलं यत्तेऽंशसवर्णनादि
कुंडमानेति ज्ञेयं॥ अथ वसंततिलकया वृत्तार्धमाह॥ खशतांशयुतेषु 

भागहीनखधरित्रीमितकर्कटेन मध्यात्॥ कृत वृत्तदलेयतश्च जीवां विदधालिंदु दलस्य सा
धुसिद्ध्यै॥ ३५॥ खीयशतांशेन युतो इषुभागः पंचमांशः। अर्थात् क्षेत्रस्यैव तेन हीना वासोखभू
मिः क्षेत्रं तस्मिं तेन कर्कटेन सूत्रेण वामध्यांकात् कृतं यद्वृत्तार्धं तस्मिन् यतः पूर्वापरां रे
खां जीवारूपां वृत्तार्धस्य सिद्ध्यै साधुस्याद्यथा तथा करोति विद्वानिति व्याख्या॥ अत्र क्षे
त्रफलं॥ अस्य क्षेत्रस्य पंचांशोंगुलाद्याः ४।६।३।१।५ एतस्य शतांशोंगुलाद्यः ०।०।३।०।४
अनेनान्वितः पंचांशः ४।६।६।२।१ अनेनोना क्षेत्र भूमिः १८।१।१।५। ७ एतद्व्यासार्धाद्द्वि
गुणं व्यासः ३८।२।३।३।६ अत्रापि व्यासस्य वर्गः १४६७।११।५।४।३ इत्यादिरीत्या क्षेत्रफ
लं ११५२।२।२।६।२ एतद्वृत्तफलं अस्यार्द्ध वृत्तार्द्धक्षेत्रफलं ५७६।१।३।१ अल्पांतरान्न
दोषा अत्रापि ध्वजायएवेति॥ अथ त्र्यस्रि वृत्तकुंडे शार्दूलविक्रीडितेनाह॥ वन्ह्यंशं पुं

रतोविधाय च पुनः श्रोण्योश्चतुर्थांशकं चिह्नेषु त्रिषु सूत्रदानतइदं
स्यात्र्यस्रिकष्टोक्षितं॥ विश्वांशो स्वजिनांशकेन सहितैः क्षेत्रेजि
नांशे कृते व्यासार्धेन मितेन मंडलमिदं स्याद्वृत्तसंज्ञं शुभं॥४०॥ अ
थ पूर्वार्द्धोक्तं कुंडं व्याख्यायते॥ क्षेत्रस्य तृतीयांशं पूर्वतो निधाय
तत उभयश्रोण्योश्चतुर्थांशं निधाय दक्षिणत उत्तरतश्च दत्वा त्रि
चिह्नेषु सूत्रदानात्कष्टरहितं त्र्यस्रि जायते इति व्याख्या॥ अथ क्षेत्रफलानयनं॥ अत्र तृ
तीयांशो ष्टांगुलानि मध्यसूत्रे योजितानि जातो लंबः ३२ पश्चिमभुजे उभयतश्चतुर्थांशः
षट् षट् अंगुलानि योजितानि जाता भूः ३६ अत्र मुखाभावात् भूमेरेखार्धं कृतं १८ इदं लं
बेनानेन ३२ निघ्नं जातं क्षेत्रफलं ५७६ समभुजता सद्यः क्षेत्रफलं च सिद्ध्यतीति कष्टोक्षित 

मित्युक्तं। अत्र किंचिद्भुजवैषम्यं तददोषाय। अत्रापि ध्वजाय एवेति।
अथोत्तरार्द्धं वृत्तमाह॥ क्षेत्रे चतुर्विंशतिविभक्ते सति त्रयोदशांशैः
स्वचतुर्विंशत्यंशयुतैर्मितेन व्यासार्द्धेन मंडलं यद्वृत्तं तद्वृत्तसंज्ञं कुं
डं सुंदरं स्यात्।३ अत्र क्षेत्रफलानयनं। अत्र त्रयोदशानां चतुर्विंशां
शोंगुलाद्यः ०।४।२।५।३ अनेन युतास्त्रयोदश १३।४।२।५।३ इदं व्यासार्द्धमेव द्विसंगुणं
व्यासः २७।०।५।२।५ अंशमपि व्यासस्य वर्गेस्मिन् ७३।३।४।०।१२ भनवाग्निनिघ्ने पंचस
हस्रभक्ते इत्यादिना क्षेत्रफलं ५७६।०।६।० अत्रापि ध्वजाय एवेति॥ अथ षडस्रस्त्र ग्धरया
माह॥ भक्ते क्षेत्रे जिनांशैर्धृतिमितलवकैः स्वाक्षिशैलांशयुक्तैर्व्यासार्द्धां मंडले तन्मित
ध्यतगुणके कर्कटे चेंदुदिक्कैः॥ षट्चिह्नेषु प्रदद्यात् रसमितगुणकानेकमेकं तु हित्वा

Indira Gandhi National Centre for the Arts

कुं०सि० नाशेसंधयश्चुद्दोषामपिचवृत्तिकृतेनेत्ररम्यंषडस्रं॥४१॥ क्षेत्रेचतुर्विंशतिधाभक्ते
२५ सतिअष्टादशांशैः सद्वासप्ततितमांशयुक्तेस्तावताव्यासार्द्धेनवृत्तेकृतेसतितेनैवव्यासा
र्द्धेनउत्तरदिक्कउत्तरदिक्कोध्वतेसतिपरावर्त्तनेनषट्चिह्नानिभवंतितेषुषट्चिह्नेषुषट्सू
त्राणिएकांतरेणपरस्परलग्नानिदद्यात्। ततः संधौयेऋतुदोषः षड्भुजास्तास्तेषांना
शो वृत्तिकृतेः मंडलस्यापिनाशेषडस्त्रिनेत्ररमणीयंजायतइतिव्याख्या॥ अस्मिन्षड
स्रेव्यासः २६।४० अत्रउत्तराग्रंत्रिकोणमेकंमहत्तद्भुजमानं। त्रिघ्नं
काग्निनभश्चंद्रै १०३६२३ र्हृत्तव्यासमाहृते। खखखखाभ्रार्कसंभक्ते
लभ्यंतेक्रमशोभुजाइतित्रयाणांभुजानांमानं ३१।४।१० उत्तरा २५
यात्पूर्वापरभुजमध्यंयावन्नीयमानसूत्रलंबश्चतुर्थांशोनोव्या

सएव २१।३१० भुजएवभूः। मुखाभावाद्भूम्यर्द्ध १५।६।३।४ लंबेननिघ्नमित्यादिनाजा
तंक्षेत्रफलं ४३२।५।२ अथास्यमहतस्त्रिभुजस्यात्रिष्वपिभुजेषुत्रीणित्र्यस्त्रीणिस
मान्येवलग्नानिसंतित्रेकस्यफलमानीयत्रिगुणंकृत्वापूर्वफलेयोजितंसत्पूर्ण
क्षेत्रफलंस्यात्। तत्रदक्षिणकोणात्पूर्वापरभुजमध्यावधिनीयमानंसूत्रलंबः
२।१।१० अयंव्यासचतुर्थांशः भुजस्त्र्यंशोभूमिः १०।४।२।३ सर्वत्रत्र्यंशएवभुजसं
पातात्। अत्रमुखाभावात्भूमेरर्द्ध ५।२।१।१ इदंलंबेनगुणितंक्षेत्रफलं ४८।०।३ वं
जातंइदंत्रिगुणंत्र्यस्त्राणामपिफलं १४४।१।१ इदंपूर्वक्षेत्रफलेस्मिन् ४३२।५।२ यो
जितं ५७६।६।३ इदंयूका त्रयाधिकषट्यवाधिकंअल्पांतरत्वाददोषः। अथवाव्या
सोयूकवा १ न्यूनःकार्यः ध्वजायसिद्धिश्च। अथवाकिमेतावताप्रयासेन। लघुत्रिको

लंयत्तत्क्षेत्रस्य द्वादशांशः तत्क्षेत्रफलं तद्द्वादशगुणं पूर्णक्षेत्रफलं स्यात्। अथेदं
कुंडं स्वबुद्धिविलासमात्ररचितमितिनोपेक्षणीयं यतः षट्कोणता समभुजताफलं
च संपद्यत एव॥ मानाधिके भवेद्रोगो मानहीने दरिद्रता इत्यादिदोषापत्तिरपिना
स्ति। अथ वक्तव्यं प्राचीनकृतकुंडविरुद्धं तर्हि दृश्यते च प्राचीनकृतकुंडेषु परस्परवि
रुद्धता इदमेव कुंडं। रामवाजपेयिभिर्विषमभुजं मंदंगाकारं कृतं राघवभट्टादिभिः
समभुजमेव कारितं। लक्ष्मणाचार्यादयोप्यन्यथैवोचुः। तस्मादस्म
दुक्तेनेत्र रमणीये समभुजे क्षेत्रफलसंवादिनि षट्कोणे विद्वद्भि
र्नानादरेण भाव्यमिति। अथ ये प्राचीनकृतावेवाग्रहिलास्तेषां तो
षयापि समषड्भुजं षडस्रं वसंततमालिकयाह॥ अथवाजिनभ



क्तकुंडमानात्तिथिभागैः खखभूपभागहीनैः॥ मितकर्कटकोद्भवे तु वृत्ते विधुदिक्तः स
मषड्भुजैः षडस्रं॥४२॥ अथवा चतुर्विंशतिभक्ते कुंडमाने सतीसीयं षष्ट्यधिकशतभा
गेन हीनैः पंचदशभागैर्मितः यः कर्कटस्तदुद्भवे वृत्ते उत्तरदिक्तः सकाशात् समैः षड्
भिर्भुजैर्दत्तैः परलग्नो षडस्रं वृत्तमार्जनेन भवतीति व्याख्या॥ अथ क्षेत्रफलानयनं॥
तत्र वृत्तव्यासे द्विसंभक्ते षडस्रे स्युर्भुजाः स्फुटा इति भुजमानं १४।७।२ क्षेत्रमध्ये द
क्षिणोत्तरां रेखां दत्वा ऊर्ध्वभुजसंपाततः पूर्वापरं रेखाद्वयं अधोभुजसंपातादपि द
द्यात्। एवं कृते चतुरस्रद्वयं परस्परलग्नं भवति। पूर्वापररेखयोर्दक्षिणोत्तररेख
या सह संपातश्चतुर्थांशे एव भवंति सैवाबाधा तन्मानं ७।३।५ भुजः १४।७।२ स्वाबा
धाभुजकृत्योरंतरमूलं प्रजायते लंब इति साधितो लंबः १२।७।१ अयमेव मध्यलं

कुं०सि० २७ बः लंबेन निघ्नं कु २९।५।४ मुखे १४।७।२ क्य ४४।५ खंडं २२।२।७ इति
जातं क्षेत्रफलं २८८।१।५ एवमपरस्यापि खंडस्य उभययोगे ५७५।३।
४ ध्वजायसिद्धिश्चेति॥ अथ पद्मकुंडं शार्दूलविक्रीडितेनाह॥ अष्टां
शाच्चयतश्च वृत्तशरके तत्रादिमं कर्णिकायुग्मे षोडश केसराणि च
रमेष्वांकेंदुभागोनिते॥ भक्ते षोडशधा शरांतरधृते स्युः कर्कटे ष्टो
छदाः सर्वांस्तान् खनकर्णिकां त्यज निजायामोच्चकां स्यात्कजं॥४३॥ क्षेत्रस्याष्टमांशात्
अष्टांशवृद्ध्या च वृत्तपंचके कृते सति तत्र पंचकमध्ये प्रथमं तत्कर्णिका। द्वितीये षोडश
केसराणि द्वितीयं केसरस्थानमित्यर्थः। अंतिमे पंचमे वृत्ते स्वस्य अंगुलत्रयात्मकस्य
नविंशत्यंशोनो निते। षोडशस्थानेषु दिक्षु विदिक्षु तदंतराले च समया विभाजिते त २७

स्मिन्वृत्ते पंचविक्रांतरे दिशि विदिशि कर्कटे धृते सति परावर्तने अष्टौ पत्राणि जा
यंते सर्वान् तान् केसरादीन् केसरवृत्ततृतीयचतुर्थवृत्तानि पत्राणि च हे विद्वन् खन। क
र्णिकां त्यज मा खन। कीदृशीं निजः स्वीय आयामो विस्तारस्तत्त्यं औच्च्यं यस्यास्तां
कजं पद्मकुंडं बहिर्वप्रमार्जनेन स्यादिति व्याख्या॥ अथ क्षेत्रफलानयनं तत्रोपांतिमस्य
चतुर्विंशत्यंगुलस्य पूर्ववत् क्षेत्रफलं ४५२।३।१ अंतिमवृत्तस्यास्य २९ अस्य वर्गः ०५।
५ भनवाग्निनिघ्ने जातं २४६७८८।५।१।३ क्षेत्रफलं ६५६।४।५।० अनयोरंतरार्द्धं
१२३।४।६।० इदं पूर्वक्षेत्रफले योजितं अंतिमवृत्तक्षेत्रफलादपवर्जितं संजातं पू
र्णफलं ५७६।०।० यूकोनं फलमायात्यतोऽदोषः। अंतिमवृत्ते लिक्षामात्रवर्धनेन
ध्वजाया सिद्धिश्चेति। अत्रांतिमवृत्ते पंचांत अर्धभू संग्रहे धर्भूत्यागश्च बुद्धिमता प्र

त्यक्षतएवोपलब्धय:॥अथाष्टाश्रिकुंडमुपजातिकमाह॥क्षेत्रेजिनांशेगजचंद्र
भागै: स्वाष्टाश्विभागेनयुजेस्कवृत्ते॥विदिक्‌दिशोरंतरतोष्टसूत्रैस्तृतीययुक्तेरि
दमष्टकोणं॥४४॥क्षेत्रेचतुर्विंशतिभागेकृतेसतिअष्टादशभागै: स्वीयाष्टाविंशां
शेनयुतै: कर्कटेनवृत्तेकृतिविदिक्‌दिशोर्मध्येकृताष्टचिह्नेभ्य: अष्टभुजेस्तृतीय
मिलितै: चिह्नद्वयंविहायतृतीयचिह्नेनयोजितैरष्टकोणंवृत्तमार्जनान्मध्यस्थाष्ट
दो: खंडमार्जनाच्चभवतीतिव्याख्या॥अत्रक्षेत्रफलानयनंव्यासार्धं १८।५।१०।०
व्यास: ३७।२२ अथच्छिद्रिनंदेषुसागरैर्वृत्तव्यासेसमाहृते॥खखखाभ्राकसंभक्ते
लभ्यंतेक्रमशोभुजाइति १४।२।२ एतद्बृहद्भुजमानंदक्षिणोत्तररेखाकोटि: आ
यतेक्षेत्रेभुजकोटिघात: फलं।भुजकोटिज्ञानंबृहद्भुजतुल्यंमध्येंतरं १४।२।२ 

याम्योत्तररेखोभयप्रांतवर्तिरेखाखंडमानेयोजितंसत्कोटि: स्यात्।यथादक्षिणो
त्तरपूर्वापररेखाखंडयोगादूर्ध्वरेखातिर्यग्रेखेभुजकोटिरूपेतदग्रालग्नीयमानो
महान्भुजएवकर्ण: १४।२।२ अस्यवर्गार्द्धमूलंतिर्यगूर्ध्वरूपभुजकोटिमानंलघु
१०।७।६।२ यतोत्रभुजकोटिवर्गयोग: कर्णवर्गोभवति।इदंकोटिमानंद्विघ्नंतत्पू
र्वभुजेयोजितंजाताकोटि: दक्षिणोत्तररेखारूप ३४।३।५।४ एतद्बृहद्भुजघाते
फलं ४८२।१।१।२॥अथकोणक्षेत्रयो: फलंलघुभुजवर्गतुल्यं
१०।१।७।६ एतत्पूर्वफलादस्मा ४८।२।१।१ शोधितंसज्जातंफ
लं ३८०।१।३।३ अस्मिन्पूर्वापरकोणानांचतुर्णांफलंयोजितं
सत्पूर्णंफलंस्यात्।तत्रपूर्वकोणयो: फलंयथाबृहद्भुजोभु

कुं०सि० ज:१४।२।२ पूर्वापररेखाखंडंकोटि:१०।०।६।२ अनयोर्घात:१४४।
२९ १।५।२ अस्मात्कोणक्षेत्रफलमेतत् ५०।७।७ शोधितंसञ्जातंपू
र्वकोणयो:फलं ६३।११।६ एतावदेवापरकोणयो: अतोद्विघ्नमेत
त् १८६।३।४ पूर्वक्षेत्रफलेऽस्मिन् ३८०।१।३।२ योजितंसञ्जातं
क्षेत्रफलं ५७६।५।० अल्पांतरत्वाद्दोष:ध्वजायासिद्धिश्च।इदं
सर्वथानेत्ररमणीयमितिअंगीकर्त्तव्यं।०॥अथप्रकारांतरेणसमाष्टभुजंअष्टास्रिउ
पजातिकयाह॥मध्येगुणेवेदयमैर्विभक्ते शक्रैर्निजर्क्षाब्धिलवेनयुक्ते:॥वृत्ते कृते
स्या दिग्विदिशोंतरालेगर्भेर्भुजै:र्दथवाष्टकोणं॥४५॥मध्येसूत्रेचतुर्विंशतिभक्तेख, २९
सप्तचत्वारिंशासहितैश्चतुर्द्दशभिर्भागै:व्यासार्धेनमंडलेकृतेतत्रादिग्विदिशोर्मध्ये

कृताष्टसूत्रै:परस्परसंलग्नैरष्टकोणंप्रकारांतरेणप्राचीनकृतिरासिकाभिमतंकुं
डंवृत्तमार्जनाद्भवतीतिव्याख्या॥अत्रक्षेत्रफलानयनं॥चंद्रर्तुनंदाकृतिभिर्२२९६३
र्व्यासार्द्धेतुसमाहते॥खखखाभ्रार्कसंभक्ते लभ्यंतेक्रमशोभुजाइतिभुजानांमा
नं१०।७।४।३।४ ततोज्याव्यासयोगांतरघातमूलंव्यासस्तदूनोदलितशर:स्या
दितिजात:शर: १।०।७।६ अथयाम्यभुजस्योभयांतात्संमुखापरभुजप्रांतद्वयं
यावत्सूत्रद्वयंकुर्यात् एवंकृतेतिर्यक्दीर्घचतुरस्रपार्श्वयोर्विषमभुजचतुर
स्रंद्वयंचस्यात्॥तत्रव्यासादस्मात् २०।४।६ सकाशाद्द्विगुणंशरंविहायशेषंदी
र्घचतुरस्रस्यभुज:२८।३।० अथवाज्याव्यासवर्गांतरमूलंभुज:किंशरकणाप्र
यासेनअष्टास्रिभुजएवकोटि:आयतेभुजेर्लंव ७।५।५।० ज्येवमुखंदीर्घचतुर

Indira Gandhi National Centre for the Arts

क्ष

समभुजएवभुजः लंबेन ०५।०५ निघ्नं कु२५।३ मुखे १०।७४३।३७
२।४।३ खंड १८।५।२१ मितिक्षेत्रफलं १४३।५।४ एवमपरस्यापि
१४३।५।४ त्रयाणां योगः ५७६।१।४। ध्वजायश्च। अथवाष्टधनुषां
फलं आनीय वृत्तफलात् संशोध्यापि क्षेत्रफलं स्यादिति। अस्मिन्
सहाष्टभुजे राघवभट्टादिभिरुक्ते शारदादिवाक्यैः सहमहान्वि
रोधस्तस्माद् अस्मदुक्तमष्टास्त्रि नेत्ररम्यं क्षेत्रफलसंवादि समभुजमेवादरणीयमिति
॥ अथ खातलक्षणं कंठलक्षणं चाह॥ खातं क्षेत्रसमं प्राकुरन्ये तु मेखलां विना॥
कंठो जिनांशमानः स्यादर्कांश इति चापरे॥४६॥ कुंडखननं क्षेत्रसमं॥ कुंडस्य चा
वन्विस्तारः। अचामश्च तावत्खननं आद्यमेखलया सहेते कुंडे कार्ये योन्यादि कुंडेषु ३०

विस्तारायामयोर्न्यूनत्वात् चतुरस्रस्यैवाचामविस्तारौ ग्राह्यौ। अन्ये तु मेखलां वर्जयि
त्वा भूमावेव तावत्खननं कार्यमित्याहुः। कंठोपि क्षेत्रतुल्य चतुर्विंशत्यंशमानः
खाताद्बहिः समंतादेकांगुलमितः अन्ये क्षेत्रस्य द्वादशांशपरिमित इति प्राहु
रिति व्याख्या। सिद्धांतशेखरे खातं कुंडप्रमाणं स्यादूर्ध्वमेखलया सहेति। प्रतिष्ठा
सारसंग्रहे। पंचत्रिमेखलो ह्यायं ज्ञात्वा शोषमधः खनेत्॥ मोहचूडोत्तरे। हस्तमा
त्रं खनेत्तिर्यक् ग्रह्योर्ध्वमेखलया सहेति। अथ पक्षांतरे। शारदातिलके। यावान्कुं
डस्य विस्तारः खननं तावदीरितमिति। प्रयोगसारे। चतुरस्रं चतुः कोष्ठं सूत्रैः कृ
त्वा यथापुरा॥ हस्तमात्रेण तन्मध्ये तावन्निम्नायतं खनेत्। गणेशविमर्शिन्यां।
चतुर्विंशांगुलायामं तावत्खातसमन्वितमिति। इति पक्षद्वैधे वयं तु। स्मृतिद्वैधे

Indira Gandhi National Centre for the Arts

कुं॰सि॰ ३३ नुविषयः कल्पनीयः पृथक्पृथक् इति वचनात्। सोमाल्पलबकुलेपूर्वोत्तरपक्षावा
श्रयणीयावितियुक्तं। यतः अर्थात्परिमाणमिति कात्यायनोक्तिः कालोत्तरे। खा
तात् बाह्येंगुलः कंठः सर्वकुंडेष्वयंविधिः॥ चतुर्विंशतिमो भागः कुंडानामंगुलं
स्मृतमिति॥ एतत्पारिभाषिकमंगुलं सर्वत्र बोद्धव्यं। सोमशंभौ। बहिरेकांगुलः
क्वचिदागमे इति तेनाद्यः पक्ष एव श्रेयान् बकुसंमतत्वात्॥ अथ मेखलानाम
धमतादिपक्षमाह॥ अधमा मेखलैका स्यान्मध्यमं मेखलाद्वयं॥ श्रेष्ठास्तिस्रो
त्रि थवाहुः पंचस्वधमतादिकं॥४७॥ एकमेखलः पक्षोधमः द्विमेखलो मध्यः पं
चमेखलः श्रेयान्। एकमेखलोधमाधम इति व्याख्या। क्रियासारे॥ नाभियो
निसमायुक्तं कुंडे श्रेष्ठं त्रिमेखलं॥ कुंडं द्विमेखलं मध्यं नीचस्यादेकमेखलमि ३३

ति। सोमशंभुना तु विशेष उक्तः॥ त्रिमेखलं द्विजे कुंडं क्षत्रियस्य द्विमेखलं॥ मेख
लैका वैश्यस्येति। अथ खातं समेखलं क्षेत्रसममिति स्पष्टवदन्॥ मेखलाल
क्षणं रथोद्धतयाह॥ अष्टधा विहितकुंडपारांशैः संखनेद्भुवमुपर्यनलांशैः॥
मेखला विरचयेदपि तिस्रः षड्जार्कलवविस्तृतिपिंडाः॥४८॥ अष्टधा भक्त
स्य क्षेत्रस्य पञ्च्यंगुलात्मको भागस्तादृशैः पंचभिर्भागैस्तिस्रो मेखला रचयेत्।
कीदृशीः षडष्टद्वादशांशा निम्नं तिथ्यंगुलेन तु। उन्नतांशा नवांगुलैरिति। क्रि
यासारे॥ प्रधानमेखलोत्सेधमुक्तमत्र नवांगुलं॥ तद्बाह्यमेखलोत्सेधं पंचांगु
लमिति स्मृतं॥ तद्बाह्यमंगुलोत्सेधमंगुलद्वितयं क्रमात्॥ चतुस्त्रिद्व्यंगुलव्या
सो मेखलात्रितयस्य तु॥ योगिनीहृदयेपि। मेखलाः शृणु मे देवि हस्तादिषु वि

Indira Gandhi National Centre for the Arts

शेषतः॥ षड्भागांकांशसंभागोर्मिताः स्युर्गोपिताः शुभा इति॥ अथप्रकारांतरेणमेख
लालक्षणंनाभिलक्षणं नाभिविपरीताख्यानिकीभ्यांशालिन्याचाह॥ रसांशका
दुन्नतविस्तृताश्चातिस्रोथवैकायुगभागतुल्या॥ पंचाथवाषड्शरवेदरामद्व्यंशो
स्कृताः स्युर्नवभागपिंडा॥४९॥ आद्यापरास्तं छरभागहीनाजिनांशकंठाद्बहिरेव
सर्वाः॥ कुंडानुकारा अपिमेखलाः स्युरर्कांगभागोच्चयततस्तनाभिः॥५०॥ कुंडा
कारोनाभिरंभोवसाम्योवा ज्ञेयंनेनांशहानिर्द्दलाग्रे॥ शेषक्षेत्रेवह्निदंत्रैः समेतेस्यु
र्वैकर्णिकेसराः पत्रकाणि॥५१॥ अथवाक्षेत्रषडंशात् उन्नताः षडंशेनैवविस्तृता
स्तिस्रोमेखलाभवंति॥ अथैकमेखलापक्षमाह॥ अथवैकैवमेखलाक्षेत्रचतुर्थां
शेनोच्चाविस्तृताचस्यात्। अथपंचमेखलापक्षमाह॥ अथवापंचमेखलाः का



र्याः षट्पंचचतुस्त्रिद्व्यंगुलैः परिभाषिकैर्विस्तृताः॥ अथपंचमेखलानामुच्चता
माह॥ तत्रादिमानवभागः पिंडऔच्चंयस्याः सा परिभाषिकनवांगुलोच्चा अस्याः पं
चमांशाः १।६।३।१।५ एषएकद्वित्रिचतुर्गुणः प्रथममेखलामानन्यूनः कृतः सन्त
दस्थानांमेखलानांऔच्चंस्यात्। यथेदंद्वितीयमेखलोच्चं ७।१।४।६।३ एवमपरासा
मपिद्रष्टव्यं। तामेखलाः सर्वाः क्षेत्रचतुर्विंशतिभागमिताल्कंठाद्बहिरेवभवंतिकी
दृश्यः कुंडानुकाराः योन्यादिकुंडेषुयोन्याद्याकाराएवस्युः अपि एवार्थे॥ अथनाभि
लक्षणमाह॥ नाभिर्द्वादशांशेनोच्चः षडंशेनविस्तृतः कुंडानुकारः॥ या दृशंचतुरस्रा
द्याकारवत्कुंडंतादृशोनाभिश्चतुरस्राद्याकारवानित्यर्थः। अथवानाभिः अंभोज
समः कमलाकारः कार्यः अयंनाभिः अब्जेपद्मकुंडेनभवतितत्रनाभिरूपाया कर्णि

Indira Gandhi National
Centre for the Arts

कुं०सि०
३२

कायाःसखात्॥अथपद्माकारकरणंनाभेरुच्यते॥दलाग्रेदलाग्रमितिमितंद्व्यंगुलोच्चे
चतुरंगुलविस्तारायामेनाभोइनांशहानिर्द्वी दशांशत्यागःकार्यःशेषंउर्वरितंक्षे
त्रंतस्मिन्वृत्तत्रयंसमभागेनकार्यं।तत्रमध्याच्चिह्नात्प्रथमंवृत्तंकर्णिकाद्वितीयंवृत्तंके
सरस्थानं।तृतीयेपत्राणिकार्याणितद्बहिरवशिष्टद्वादशांशेनदलाग्राणिरचये
दितिव्याख्या।वा॥शिष्यांप्रथमंमेखलातत्रद्वादशांगुलविस्तृतिः।चतुर्भिरंगुलैस्त
स्याश्चोन्नतिश्चसमंततः॥तस्याश्चोपरिवप्रःस्याच्चतुरंगुलमुन्नतः॥अष्टाभिरंगु
लैःसम्यक्विस्तीर्णस्तुसमंततः॥तस्योपरिपुनःकार्योवप्रःसोपितृतीयकः॥चतु
रंगुलविस्तीर्णश्चोन्नतश्चतथाविधइति॥तथाचपिंगलामते॥एकाषडंगुलोत्से
धविस्तारामेखलामतेति।लक्षणसंग्रहेतुविशेषः॥चतुरंगुलविस्तारोत्सेधावे ३२

केवमेखलेति॥तत्रांतरेषष्ठांशेनाष्टमांशेनमेखलाद्वितयंविदुरित्ययंपक्षः।अ
बहुसंमतत्वादुपेक्षितएव॥सिद्धांतशेखरे॥षड्बाणाब्धिवह्निनेत्रमिताःस्युःपंच
मेखलाइतिलक्षणसंग्रहे।पंचवामेखलाःकार्याःषट्पंचाब्धित्रिपक्षकैः॥प्रथ
माबाशरांशेनपूर्वोत्सेधेनवांगुलेति॥पिंगलामते॥खातादेकांगुलंत्यक्त्वामेखला
नांस्थितिर्भवेदिति॥शारदायां॥कुंडानांयादृशंरूपंमेखलानांचतादृशमिति॥त
त्रैव॥कुंडानांकल्पयेदंतर्नाभिमंबुजसंनिभं॥तत्रकुंडानुरूपंचामानमस्यनिगद्यते
॥मुष्टिरत्न्येकहस्तानांनाभितत्सेधतारतः॥नेत्रवेदांगुलोपेतेति पद्मनाभिंविव
र्जयेत्॥इतिप्रागेवलिखितंअंबुजाकारकरणंतत्रैव॥पद्मदीनस्यसंल्य– द्वाद
शांशंबहिःसुधीः॥तन्मध्यंविभजेद्वृत्तैस्त्रिभिःसमविभागतः॥आद्यंस्यात्कर्णिका

Indira Gandhi National
Centre for the Arts

स्थानंकेसराणांद्वितीयकं॥तृतीयंततपत्राणांमुक्तांशेनदलाग्रकमिति॥अथयोनि
लक्षणंस्रग्धरयाह॥योनिर्व्यासार्द्धदीर्घाविततिगुणलवादायताब्धिद्विभागा‍त्कुंगा
तावत्समंतात्परिधिरुपरिगातावदग्रेणरम्या॥निम्नंकुंडंविशंतीवलयदलयुगे
नान्विताधोविशालामूलात्सछिद्रनालांतरवटरुचिरास्वच्छपत्राकृतिःसा॥स्र०॥
योनिर्व्यासार्द्धेनदीर्घा॥विस्तारस्तृतीयांशेनविस्तीर्णाचतुर्विं शांशेनोच्चा।चतुर्विं
शांशेनपरिधिर्मेखलायस्याःसातावतैवाग्रेणचतुर्विंशांशेननिम्नंयथास्यात्तथा
कुंडंप्रविशंतीवलयदलयुगेनवृत्तार्द्धद्वयेनयुताअधोविशालाअर्थात्उपरिस्व
ल्पसंकोचवतीमूलाद्गमूलात्सकाशात्मध्येसछिद्रंनालंयस्याःसापद्मनाला
कारत्वान्नालोक्तिःअंतर्मध्येअवटोगर्त्तःस्रुचिघृतधारणार्थंयद्वृत्तेनरुचिरासु 

दरासा।अश्वपत्राकृतिःस्यात्इतिव्याख्या।वायवीये॥मेखलामध्यतःकुर्यात्पश्चि
मेदक्षिणेपिवा॥शोभनांमध्यतःकिंचित्निम्नामुन्मीलिकांशनैरिति॥त्रैलोक्य
सारे॥दीर्घांसूर्यांगुलायोनिस्त्र्यंशोनाविस्तरेणतु॥एकांगुलोछ्रितासातुप्र
विष्टाभ्यंतरेतथा॥कुंभद्वयार्द्धसंयुक्ताचाश्वत्थदलवन्मता॥अंगुष्ठमेखला
युक्तामध्योछ्रितामित्यस्यविवरणं॥नवांगुलामेखलाद्व्यंगुलद्वयंउछ्रायकुत्र
चिदुक्तः।अंगुलपरिधिरितिद्वादशांगुलोछ्रायःअयंप्रायोबहुसंमतःपक्षो
न।अतोस्मदुक्तएकादशांगुलोछ्रायःपक्षोबहुसंमतःकार्यः॥शारदातिल
के॥स्थलादारभ्यनाष्टंस्यात्योन्यामध्येसरंध्रकमिति।द्वादशांगुलमेखला
पक्षेयोनिलक्षणमाह॥अथार्कांगुलपक्षेतुमेखलानांदशांगुलैः॥विस्तृता

Indira Gandhi National
Centre for the Arts

कुं०सि० तिथिभिर्दीर्घांगुलिभिर्योनिरिष्यते॥५३॥मेखलानां द्वादशांगुलपक्षे दशांगुले
३५ विस्तृता तिथ्यंगुलैः पंचदशांगुले दीर्घा योनिः स्यादिति व्याख्या॥प्रयोगसारे॥
स्थितां प्रतीच्यामायामे सम्यक् पंचदशांगुला॥द्विपंचांगुलविस्तारा षट्चतुर्द्व्यं
गुली क्रमात्॥व्यक्ताश्वत्थदलाकारां निम्ना कुंडे निवेशितां॥त्रयोदशांगुलोत्से
धां योनिं कुंडस्य कारयेत्॥केचित्तु योनिक्षेत्रस्य दीर्घचतुरस्रस्वरूपस्य यत्फलं त
स्य मूलमानीय तावत्समचतुरस्रं संसाध्य योनिकुंडवद्योनिं साधयेदित्याहुः॥
केचित्तु स्थूलप्रकारेण यथोक्तां योनिं साधयेदित्याहुः॥तत्र प्रकारद्वयमपि
विश्वकर्मणा दर्शितं तदत्र विस्तरभयान्न लिखितमिति॥अथ कुंडप्रकरणा
शक्तौ स्थंडिलं वसंतमालिकयाह॥अथवापि मृदा सुवर्णभासा करमानं चतु ३५

रंगुलोच्चमस्मिन्॥हवने विदधीत वांगुलोच्चं विबुधः स्थंडिलमेव वेदकोणं॥५४॥
अथवास्मिन् हवने विबुधः पंडितः चतुरंगुलोच्चं वा।एकांगुलोच्चं हस्तमात्रवि
स्तारायामं चतुःकोणं स्थंडिलमेव मृदा विदधीत कुर्यात्।कीदृश्या मृदा
शोभनो वर्णः पीतरक्तादिः सा आभा कांतिर्यस्याः सा तादृश्येति व्याख्या॥
तत्रांतरे॥मृदा सुवर्णया वापि सूक्ष्मवालुकयापि वा॥अंगुलोच्चं तथा वेदां
गुलोच्चं स्थंडिलं विदुः॥चतुःकोणमुदक्प्राचीप्लवमस्मात्कृतौ शुभं॥पंचांगु
लोच्चमथवा वस्वंगुलसमुन्नतमिति॥अथेयं मत्कृतिरुपेतोशतोयायेति
वसंतमालिकयाह॥इति मंडपकुंडसिद्धिमेनां रुचिरां विठ्ठलदीक्षितो व्य
धत्त॥अधिकाशिनगर्य्युमेशतुष्ट्यै विबुधः शोधयतादिमां विचार्य॥५५॥

कुं०सि०
३५

इतिएवंप्रकारेणविठ्ठलदीक्षितोरुचिरांमनोहरांमंडपकुंडसिद्धिंनामग्रंथर
चनांकाशीनगरेउमेशयोस्तुष्ट्यैकृतवान्इमांविबुधैर्विचार्यशोधयितुंअर्था
द्विचार्यनाशोधयात्॥कृतिदिवसमाह॥शशियुगतिथिगण्येयातिशा
केवरेण्येविभवशरदिरम्येमासिशस्येतपस्ये॥शरधरभृतिदक्षेकृष्णपक्षे
वलक्षेकमलनयनतिथ्यांभानुमद्वारवत्यां॥५६॥ग्रंथंतेतिपूर्वश्लोकेना
न्वयः॥ग्रंथेपरोक्तेममदूषणेत्वयाकिंवागुणेत्वयाविदुषाविचार्य॥ग्रंथे
मदुक्तेसदसद्धिशोध्यंसर्वस्तुसर्वंनहिवेदकश्चित्॥५७॥अंगीकार्या
मत्कृतिर्निर्मलेयंकस्मादेवंपंडितान्प्रार्थयेहं॥क्षीरंपेयंनीरमेतद्धि ३५
हायकोवाविज्ञंहंसमभ्यर्थयेत्॥५८॥इतिविठ्ठलदीक्षितविरचि

कुं०सि०
३७

ताकुंडसिद्धिःसमाप्ता॥संवत्१८८२चैत्रशुद्ध६तद्दिनेलिखितमिदंपु
स्तकंमहाजन्युपाख्यज्योर्विदाभेश्वरात्मजवीरेश्वरसुतरघुनाथेन॥स्वा
र्थंपरार्थंच॥गजानन॥महालक्ष्मीप्रसन्नास्तु॥मुकामजाल्ठवण॥छ॥

३७

९४४८

इति कुंडसिद्धिः समाप्ता

Indira Gandhi National
Centre for the Arts